समयेतस्यामात्योमहाबलः गृहीत्वाशत्रुसामन्तंराज्ञोन्तिकमुपागमत् अमात्येनसमानीतंशत्रुसामन्तमुद्धतं
दृष्ट्वातुक्रोधनृपतिःशिरश्छेदमुपाकरोत् सतथैवमहीपालोविसृज्यशिवपूजनं असमाप्तोनियमश्च
कारनिशिभोजनं तत्पुत्रोपितथाचक्रेप्रदोषसमयेशिवं अनर्चयित्वामूढात्माभुक्त्वासुष्वापदुर्मदः जन्मा
न्तरेसनृपतिर्विदर्भनृपतिर्भवान् शिवस्यार्चनरायेणपरैर्भोगानरहतः तत्पुत्रोयंपूर्वभवेसोस्मिन्जन्म
नितत्सुतः हत्वादारिद्र्यमापन्नःशिवपूजाव्यतिक्रमात् अस्यमातापूर्वभवेसपत्नींकद्मनाहनत् तेनस्यां
पन्नमहताग्राहेणास्मिन्जन्मनि एषाप्रवृत्तिरेतेषांभवत्येसमुदीरिता अनर्चिताशिवामत्याःप्राप्नुवं

ब्रं.खो.
२१
तिरीरितां सत्यंब्रवीमिपरलोकहितंब्रवीमिसारंब्रवीम्युपनिषद्धृदयंब्रवीमि संसारमुल्बणमसारजंतोः
सारोयमीश्वरपदांबुरुहस्यसेवा येनार्चयंतिगिरिशंसमयप्रदोषेयेनार्चितंशिवपदंप्रणमंतिचा मवाप्य×
न्ये एतत्कथांश्रुतिपुटैर्नपिबंतिलोकास्ते जन्मजन्मसुभवंतिनरादरिद्राः येवैप्रदोषसमयेपरमेश्व
रस्यकुर्वंत्यनन्यमनसोंघ्रिसरोजपूजां नित्यंप्रवृद्धधनधान्यकलत्रपुत्रसौभाग्यसंपदधिकास्तइ
हैवलोके कैलासशैलशिखरेत्रिगजंतिनीं गौरींनिवेश्यकनकांचितरत्नपीठे नृत्यंविधातुमभिवांछ
तेरालपाणौदेवाः प्रदोषसमयेनुभजंतिसर्वे वाग्देवीधृतवल्लकीशतमखोवेणुंदधत्पद्मजस्ताल
नेद्धकरोरमाभगवतीगेयप्रयोगान्विता विष्णुःसांद्रमृदंगवादनपटुर्देवाःसमंतात्स्थिताः सेवंत २१
तमनुप्रदोषसमयेदेवंमृडानीपतिं गंधर्वयक्षपतगोरगसिद्धसाध्याविद्याधरामरवराप्सरसांग
णाश्च येन्येत्रिलोकनिलयाःसहभूतवर्गाः प्राप्तप्रदोषसमयेहरपार्श्वसंस्थाः प्रदोषकालेशिवएकए

ज्ञेयोनान्योहरिःपद्मजरेचमुख्याः तस्मिन्महेशेविधिनेज्यमानेसर्वेप्रसीदंतिसुराधिनाथाः एषतेतनयःपूर्वजन्म
निब्राह्मणोत्तमः प्रतिग्रहैर्वयोनिन्येनदानैर्यज्ञकर्मभिः अतोदारिद्र्यमापन्नःपुत्रस्तेद्विजभामिनि तद्दोष
परिहारार्थंशरणंयातुशंकरम् इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेप्रदोषमहिमानुवर्णनंनामषष्ठोध्या
यः श्रीः सूतउवाच इत्युक्त्वामुनिनासाध्वीसाविप्रवनितापुनः तंप्रणम्याथपप्रच्छशिवपूजाविधिंक्र
मं शांडिल्यउवाच पक्षद्वयेत्रयोदश्यांनिराहारोभवेद्द्विजः घटिकात्रयादस्तमयात्पूर्वंस्नानंसमाचरेत् शुक्लांब
पुरतःसम्यगुपलिप्यनयांभसा विधायमंडपंरम्यंधौतवस्त्रादिभिर्बुधः वितानाद्यैरलंकृत्यफलपुष्पन
वांकुरैः विचित्रपद्ममुद्धृत्यपंचवर्णपंचकसंयुतं तत्रोपविश्यसुशुभेसोपविष्टःस्थिरासने सम्यक्संपादितारोष
पूजोपकरणःशुचिः आगमोक्तेनमंत्रेणपीठमामंत्र्यसाक्षीः ततःकृत्वात्मशुद्धिंचभूतशुद्धिमनुक्रमात
प्राणायामत्रयंकृत्वाबीजमंत्रैःसबिंदुकैः मातृकान्यासविधिनाध्यात्वातोदेवतांपरां समाप्यमातृकाभरयोध्या

वैष्णो. २९

सचैवंपरंशिवं वामभागेगुहंन्यसेद्दक्षिणेगणपंन्यसेत् अंसोरुयुग्मेधर्माद्यान्नाभौचपार्श्वयोः अधर्मा
दीननंतादीन्हृदिपीठंचविन्यसेत् आधारशक्तिमारभ्यज्ञानात्मानमनुक्रमात् उत्क्रमेणविन्यस्याहृत्पद्मेसाधु
भावयेत् नवशक्तिमयंरम्यंध्यायेद्देवमुमापतिं चंद्रकोटिप्रतीकाशंत्रिनेत्रंचंद्रभूषणं आपिंगलजटाजूटं
रत्नमौक्तिकविराजितं नीलग्रीवमुदारांगंनानारत्नोपशोभितं वरदाभयहस्तंचधारिणंचपरश्वधं दधानंनागव
लयंकेयूरांगदमुद्रिकं व्याघ्रचर्मपरीधानंरत्नसिंहासनस्थितं ध्यात्वातद्वामभागेचचिंतयेद्गिरिकन्यकाम्
भास्वज्जपाप्रसूनाभासुरपावकसमप्रभां विद्युत्पुंजनिभांतन्वींमनोनयननंदिनीं बालेंदुशेखरांस्निग्धांनील
कुंचितकुंचितां भृंगसंघातरुचिरनीलालकविराजितां मणिकुंडलविद्योतमुखमंडलविभ्रमां नवकुंकुमपं
कांकितकपोलद्वयदर्पणां मधुरस्मितविभ्राजदरुणाधरपल्लवां कंबुग्रीवांशिवामुच्चकुचपंकजकुड्मलां पा
शांकुशाभयकरैर्विलसंतींचतुर्भुजां अनेकरत्नविलसत्कंकणांगदमुद्रिकां त्रिवलीवलयांरद्धांहेमकां

शिव. २९

चीगुणान्वितां दिक्पालवनितामौलीसन्नितांघ्रिसरोरुहां रत्नसिंहासनारूढांसर्पराजपरिच्छदां एवंध्यात्वाम
हादेवंदेवींचगिरिकन्यकां न्यासमंत्रेणसंपूज्यदद्याद्गंधादिभिःक्रमात् पंचभिर्नवभिःकुर्यात्तोत्स्थानेनवाह
रि पथकृपुष्पांजलिंदद्याद्दहस्तकेनवैतदा पुनःपुष्पंयंशिवोभूत्वात्मकमंत्रेणसाधकः ततःसंपूजयेद्देवं
बाह्यपीठेपुनःक्रमात् संकल्पंप्रवदंतंत्रपूजमंत्रेणसंवतः कृतांजलिपुटोभूत्वाचिंतयन्हृदिशंकरं कृपा
पातकदौर्भाग्यदारिद्र्यविनिवृत्तये अशेषाघविनाशायप्रसीदममशंकर दुःखरोगादिसंतप्तंसंसारभय
पीडितं बहुरोगाकुलंदीनंपाहिमांवृषवाहन आगच्छदेवदेवेशमहादेवाभयंकर गृहाणसहपार्वत्यातच
पूजांमयाकृतां इतिसंकल्पविधिवद्बाह्यपूजांसमाचरेत् गुहंगणपतिंचैवभयजेसव्यापसव्ययोः क्षेत्र
शमीशकोणेचवह्नौकात्यायनींन्यसेत् धर्मज्ञानेचवैराग्यमैश्वर्यंचनमोंतकैः स्वरैरग्न्यादिकोणेषुपीठेपा
दमनुक्रमात् आभ्यांचबिंदुसर्गाभ्यामधर्मादीन्प्रपूजयेत् गात्ररक्षांचतुर्दिक्षुमध्येनंतसवारकान् सत्वा
दींस्त्रिगुणान्तनुरूपान्पीठेषुविन्यसेत् वामाद्यान्नवशक्तींश्चानवस्वरयुतान्यजेत् हरिबीजत्रयाद्येनपीठमंत्रे

ब्रं पावार्चयेत् जाग्रतिः पंचमीगौरस्तपंचभिर्मूर्तिशक्तिभिः त्रिशक्तिमूर्तिभिश्चात्मविधिद्वयसमन्वितै अनंताद्यैः
२९ परिवाराद्या मातृभिश्च वृषादिभिः सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्च तदायुधैः वृषभस्तेत्रचौडीशो दुर्गो
वस्कंदनंदनौ गणाशसेन्यपश्चैव स्वस्वलक्षणलक्षिताः अणिमा महिमा चाथ गरिमा लघिमा तथा
ईशत्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च अष्टैश्वर्याणि चाप्येतानि तेजोरूपाणि केवलं मंत्रभिर्बहुलभिः
पूर्वक्लृप्ते स्वायाभिरप्युत अंगैरुमाद्यैरिंद्राद्यैः पूजितो मुनिभिः स्वाभैः उमा चेडश्वरादीशं पूजयेदु
त्तरादिभिः एवमावरणैर्युक्तं तेजोरूपं महाशिवं उमया सहितं देवमुपचारैः प्रपूजयेत् सुप्रतिष्ठित
शंखस्य तीर्थैः पंचामृतैरपि अभिषिच्य महादेवं रुद्रसूक्तैः समाहितः कल्पयेद्विविधैर्वस्त्रैर्नानाउ २९
पचारकान् आसनं कल्पयेत्तत्र स्वागतं विहितांजलिः अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन च
तेनैवाचमनं दद्यान्मधुपर्कं मधूत्तमं पुनराचमनं दद्यात्स्नानमंत्रैः प्रकल्पयेत् उपवीतं तथा वा

वासोभूषणानि निवेदयेत् गंधमष्टांगसंयुक्तं सुपूतं च निवेदयेत् निवेदयेत्सुगंधीनि माल्यानि विविधा
नि च धूपं कालागरूत्पन्नं दीपं च विविधं शुभं ततश्च बिल्वमंदारकल्हारं सरसीरुहं धुत्तूरकरवीरं च
द्रोणपुष्पं च मल्लिकां कुशापामार्गतुलसीमाधवीचंपकादिकां बृहतीपुष्पसाराणि यथालब्धानि सा
चयेत् अपायसनैवेद्यं सघृतं सोपदंशकं मोदकापूपसंयुक्तं शर्करागुडसंयुतं मधुनो दधि घृतं जलं
पानसमन्वितं तेनैव कुर्याद्गौरी हविषा मंत्रभावितं नैवेद्यं शंभवे दत्वा तथा तांबूलमुत्तमं दीपनीराजनं
रम्यं छत्रं दर्पणमुत्तमं समर्पयित्वा विधिवन्मंत्रैर्वैदिकतांत्रिकैः यथाशक्तिः स्तवैर्नित्यं स्तुत्वा यथाविधि भवमर्च
येत् भक्तास्ते न गौरीशः पुष्पमात्रेण तुष्यति स्तवैर्नानाविधैः स्तुत्वा साष्टांगं प्रणमेद्बुधः ततः प्रदक्षिणा
श्वरा कृत्वा वृषचंडेश्वरादिकान् पूजां समाप्य विधिवत्प्रार्थयेद्गिरिजापतिं जय देव जयाजेय जय शंकर शा
श्वत जय शर्व महाध्यक्ष जय सर्ववरप्रद जय नित्य निराधार जय विश्वंभराव्यय जय विश्वैकवंद्येश जय

अंलो. नागेंद्रभूषण जय गौरीपते शंभो जय चंद्रार्धशेखर जय कोट्यर्कसंकाश जयानंतगुणाश्रय जय रुद्र विरूपा
30 क्ष जय नित्य निरंजन जय नाथ कृपासिंधो जय भक्तार्तिभंजन जय दुस्तरसंसारसागरोत्तारण प्रभो प्रसीद मे
महाभाग संसारार्तस्य खिद्यतः सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर महादारिद्र्यमग्नस्य महापापहतोऽसः
महाशोकनिविष्टस्य महारोगातुरस्य च ऋणभारपरीतस्य खिद्यमानस्य कर्मभिः ग्रहैः प्रपीड्यमानस्य प्रसी
द मम शंकर दरिद्रः प्रार्थयेद्देवं पूजांते गिरिजापतिं ब्राह्मणान्भोजयेद्भक्त्या दक्षिणाभिश्च पूजयेत् सर्वपा
पक्षयकरी सर्वदारिद्र्यनाशनी शिवपूजा मयाख्याता सर्वाभीष्टफलप्रदा महापातकसंघातमधिकं चो
पपातकं शिवद्रव्यापहरणादन्यत्सर्वं विनाशयेत् ब्रह्महत्यादिदोषाणां पुराणेषु स्मृतिष्वपि प्रायश्चित्ता
नि दृष्टानि न शिवद्रव्यहारिणं बहुनात्र किमुक्तेन श्लोकार्धेन ब्रवीम्यहं ब्रह्महत्याशतं वापि शिवपूजा वि राम. 30
नाशयेत् मया कथितमेतत्ते प्रदोषे शिवपूजनं सरहस्यं सर्वजंतूनां मंत्रनास्त्येव संशयः एतात्वमवपुत्रा
भ्यां मम पूजा विधीयतां अतः संवत्सरादर्वाक्परां सिद्धिमवाप्स्यथ इति शांडिल्यवचनमाकर्ण्य द्विजभामिनी ॥

ताभ्यां तु सह बालाभ्यां प्रणनाम मुनेः पदं विप्रपत्न्युवाच अहमद्य कृतार्थास्मि तव दर्शनमात्रतः एतौ कुमारौ भगवन्
न्नतौ मय्य शरणं गतौ एष मे तनयो ब्रह्मन् शुचिव्रत इतीरितः एष राजसुतो नाम्ना धर्मगुप्तः कृतो मया एतावहं च
भगवन् भवच्चरणकिंकरौ समुद्धरास्मान्पतितान्घोरसंसारसागरे इति प्रपन्नां शरणां द्विजस्त्रीमाश्वास्य
वाक्यैरमृतोपमानैः उपादिदेशाथ तयोः कुमारयोर्मुनिः शिवाराधनमात्रविद्यां अथोपदिष्टौ मुनिना कुमारौ ब्रा
ह्मणी च तस्मै तं प्रणम्य समामंत्र्य जग्मुस्ते शिवमंदिरात् ततः प्रभृति तौ बालौ मुनिवर्योपदेशतः प्रदोषे पार्वतीशस्य
पूजां चक्रतुरंजसा एवं पूजयतोर्विप्रा द्विजराजकुमारयोः सुखेनैव व्यतीयाय तयोर्मासचतुष्टयं कदाचिद्रा
जपुत्रेण विना स द्विजनंदनः स्नातुं गतो नदीतीरे चचार बालकलीलया तत्र निर्झरनिर्घाताद्विनिर्भिन्ने प्रकु
ट्टिमे निधानकलशं स्फुरंतं ददर्श ह तं दृष्ट्वा सहसागत्य हर्षकौतुकविह्वलः दैवोपपन्नं मन्वानो गृ
हीत्वा शिरसा ययौ ससंभ्रमं समानीय निधानकलशं वरं निधाय भवनस्यांते मातरं समभाषत मातर्मा
तरिदं पश्य प्रसादं गिरिजापतेः निधानकुंभरूपेण दर्शितं करुणात्मना अथ सा विस्मिता सा

बं.रं.
३४

ध्वीसमाहूयनृपात्मजं स्वपुत्रंप्रतिनेदंनीतिमानयतिशिवाचैनं श्रणुतामेववचः पुत्रौनिधानकलशौ तविदं स
मंविभज्यगृह्णीतंममशासनगौरवात् इतिमातवचःश्रुत्वानुनोपद्विजनंदनः प्रत्याहराजपुत्रस्तांविस्त्रब्धः
शंकरार्चने मातस्त्वयसुतस्यमेदंस्त्रहतेनसमागतं नगृह्णीतुमिच्छामिविभक्तंधनसंचयं आत्मनःसुताल्ल
ब्धंस्वयमेवाप्नुयाद्धनं सएवभगवानीशोकरिष्यतिकृपांमयि एवमर्चयतःशंभुंभूयोपिपरयामुदा संप
त्सरेव्यतीयायतस्मिन्नेवगृहेतयोः अथैकदाराजसूनुःसहतेनद्विजन्मना वसंतसमयप्राप्तविजहार
वनांतरे अथदूरंगतोधापिवनेद्विजनृपात्मजौ गंधर्वकन्याःक्रीडंतीःशतशस्तावपश्यतां ताःसर्वाश्चा
रुसर्वांगयोविहरंतिमनोरमं दृष्ट्वाद्विजात्मजोदूराडुवाचनृपनंदनं इतःपरंनगंतव्यंविहरंत्योमनास्त्रि
यः स्त्रीसन्निकर्षंविबुधास्त्यजंतिविमलाशयाः एताःकेतवकारिण्याधनयोवनदुर्मदाः अतःपरिस्त
जेत्स्त्रीणांसन्निधिंसहभाषणं निजधर्मरतोविद्वान्ब्रह्मचारीविशेषतः अयोहंनोत्सहेगंतु× मोहयंति ३२
नरंदृष्ट्वावरानुनयकोविदाः ×२ क्रीडास्थानंमहीमीदृशां इत्युक्त्वाद्विजपुत्रस्तुनिवृत्तोदूरदेशतः अथा

सोराजपुत्रस्तुकौतुकाविष्टमानसः तासांविहारपदवीमेकएवविनिर्ययौ तत्रगंधर्वकन्यानांमध्येवै
कवरानाना दृष्ट्वायांतंराजपुत्रंचिंतयामासचेतसा अहोकोयमुदारांगोयुवासर्वांगसुंदरः मत्तमा
तंगगमनोलावण्यामृतवारिधिः लीलालोलविशालाक्षोमधुरस्मितपेशलः मदनोपमरूपश्रीःसु
कुमारांगलक्षणः इत्याश्चर्ययुताबालाद्दूराद्दृष्ट्वानृपात्मजं सर्वाःसखीःसमालोक्यवचनंचेदमब्र
वीत् इतोविदूरभ्रेशोसख्यावनमस्त्येकमुत्तमं विचित्रचंपकाशोकपुन्नागबकुलैर्युतं तत्रागसद्रुतं
सर्वाःसंचीयकुसुमानितमं भवत्यःपुनरायातुतावत्तिष्ठाम्यहंत्विह इत्यादिष्टाःसखीवर्गाजगामविपिनां
तरं सापिगंधर्वजातस्थोन्यस्तदृष्टिर्नृपात्मजे तांसमालोक्यतन्वंगींनवयौवनशालिनीं बालांस्वरू
पसंपन्नापरिभ्रयांतिकौतिमा राजपुत्रःसमागम्यकौतुकोत्फुल्ललोचनः अवापदैवयोगेनमदनस्यश
रव्यथाम् गंधर्वतनयासापिप्राप्ताप्यनृपसूनवे उत्कायतरसातस्मैप्रददौपल्लवासनं ततोपचारमा

ब्रंह्मो॰ सीनंतयासाध्यसमध्यमा पप्रच्छरूपसद्गुणैर्ध्वस्तधैर्याकुलेंद्रिया कस्त्वंकमलपत्राक्षकस्मादिहास
३२ मागतः कस्यपुत्रइतिप्रेम्णा एवंसर्वंन्यवेदयत् चिरंसराजननंयथाविध्वस्तपितृमातृकं शत्रुभिश्चाहृतस्था
नमात्मानंपरराष्ट्रगं सर्वमावेद्यभूयस्तांपप्रच्छनृपनंदनः कात्वंवामोरुकिंचात्रकार्यमितेकस्य वासिजा
किमिहध्यायसिहृदा किंवावकुमिहेच्छसि इत्युक्तासापुनःप्राहशृणुराजेंद्रसत्तम अस्त्येकोद्रविणोनाम
गंधर्वाणांकुलाग्रणीः तस्याहमस्मितनयानाम्नाचांशुमतीस्मृता सामाह्यांतंविलोक्याहंत्वत्संभाषण
लालसा त्यक्त्वासखीजनंसर्वमेकैवास्मिमहामते सर्वासंगीतविद्यासुमत्तोनान्यास्तिकोचन ममेग
यनतुष्यंतिसर्वा अपिसुरस्त्रियः साहंसर्वैकलाभिज्ञा ज्ञातसर्वजनेंगिरा त्वाहमीप्सितंयाचे त्वयि राम॰
मेसंगतंमनः तथात्वामपिनोसख्यंदैवेनप्रतिपादितं आवयोःस्नेहभेदोत्रनाभिभूयादितःपरं इति ३२
संभाष्यतेनांशुप्रेम्णा गंधर्वनंदिनी मुक्ताहारंददौतस्मैस्वकुचाचारभूषणं तमादायाद्भुतंहारंसत

स्याःप्रणयाकुलः गाढहर्षसमाश्लिष्टामिदमाहनृपात्मजः सत्यमुक्तंत्वयाभीरु तथाप्येकंवदाम्यहं
सक्तराज्योस्मिनिःस्वस्यकथंत्वंभवसिप्रिया सात्वंपितृवतीबालाविलंघ्यपितृशासनं स्वच्छंदाचरणंकु
र्वंमंदेकथमिहेच्छसि इतितस्यवचःश्रुत्वातंप्रत्याहशुचिस्मिता अस्तुनामतथैवाहंकरिष्येममकौतुकं
गच्छतावत्स्वभवनंपरश्वःप्रातरेवहि आगच्छपुनरत्रैवकार्यमस्तिननामृषा इत्युक्त्वातंनृपसुतंसासंग
तसखीजना अपक्रामत्तावेगीसच्चपिनृपनंदनः ससमभ्येत्यहर्षेणद्विजपुत्रस्यसन्निधिं सर्वमा
यतेनैवसार्धंसभवनंययौ सतयापूर्वनिर्दिष्टंस्थानंप्राप्यनृपात्मजः गंधर्वराजमद्राक्षीत्स्वदुहित्रास
मागतं सगंधर्वपतिःप्राप्तौमभिमतंचकुमारकौ उपवेश्यासनेरम्येराजपुत्रमभाषत गंधर्वउवाच राजेंद्रपु
त्रपूर्वेद्युःकैलासंगतवानहं तत्रापश्यन्महादेवंपार्वत्यासहितंप्रभुं आहूयमांतुदेवेशःसर्वेषांतुदिवौकसां
सन्निधौचाहभगवान्करुणामृतवारिधिः धर्मगुप्ताह्वयःकश्चिद्राजपुत्रोस्तिभूतले अकिंचनोभ्रष्टरा
ज्याहृतराज्यश्चबंधुभिः सचाकोगुरुवाक्येनमच्चर्यारतःसदा अद्यतस्मिन्नरःसर्वेमांप्राप्तास्तत्प्रभावतः

ब्रं.नो. नस्त्वं त्वमपि साहाय्यं कुरु गंधर्वभूमिप ॥ अथासौ निजराज्यस्थो हतशत्रुर्भविष्यति ॥ इत्याज्ञप्तोहमीशेन संप्राप्य निजमं
३३. दिरं । अनापाख्यां दुहितरं प्राप्तोस्मीश्वरं ततः परं । अतएनां प्रयच्छामि कन्यां मम नयप्रिय । हतशत्रून्स्वराज्ये त्वां स्थापया
मि शिवाज्ञया । तस्मिन्पुरे त्वमनया भुक्त्वा भोगान्यथेप्सितान् । दशवर्षसहस्राणि गंतासि गिरिशालयं । तत्रापि मम कन्ये
यं त्वामेव प्रतिपत्स्यते । तस्मिन्नेव स्वदुहितुः पाणिग्राहमपश्यतां । परिबर्हमना तस्मै रत्नभारं महोज्ज्वलं । चूडामणिं च
द्रनिभं मुक्ताश्च भासुरान् । गजानामयुतं भूयो नियुतं निजवाजिनां । स्यंदनानां सहस्राणि सौवर्णानि महांति च । पुन
रेकं धनुर्दिव्यं ददौ शत्रुक्षयायुधोपमं × दिव्यालंकारवासांसि कांचनं स्वरपरिच्छदान् × अस्त्राणां च सहस्राणि तूणी चाक्षय
सायकौ । असह्यं चर्म सौवर्णं शक्तिं च परमर्द्धिनीं । दुहितुः परिचर्यार्थं कन्यानां च सहस्रकं । ददौ प्रीतमनस्तस्मै धनानि विवि
धानि च । गंधर्वसैन्यमतुलं चतुरंगसमन्वितं । पुनश्च तत्सहायार्थं गंधर्वाधिपतिर्ददौ । इत्थं राजेंद्रतनयः संप्राप्य श्रिय
मुत्तमां । स्वराष्ट्रं जायासहितो मुमुदे परया मुदा । कारयित्वा स्वदुहितुर्विवाहसमयोचितं । ययौ विमानमारुह्य गंधर्वाधिप ३३
तिर्दिवं । स राजपुत्रः धृतोद्वाहः सह गंधर्वसेनया । निःशेषारातिबलः प्रविवेश स्वकं पुरं । पुनस्त्वममतीमाश्य दुर्धर्षणं रणे
हित्वा सह गंधर्वसेनया । पुनः स्वनगरीं प्राप्य जघान रिपुवाहिनीं । ततोभिषिक्तः सचिवैर्ब्राह्मणैश्च महात्मभिः । रत्नसिंहा

सनारूढः स्वके राज्यमकंटकं । या विश्ववनिता पूर्वं तमपुष्यत्स्वपुत्रवत् । सैव वर्मवती भार्या तस्य सन्माता द्विजनंदनः । गंधर्वतनया
जाया वैदर्भविषयेगतः । आराध्य देवतं शंभुं दुर्मगुप्तो नृपोभवत् । एवमन्ये समाराध्य प्रदोषे गिरिजापतिं । सूतः एतन्म
हाव्रतं पुण्यं प्रदोषे गिरिजार्चनं । धर्मार्थकाममोक्षाणामेतत्संसाधनं परं । य एतच्छृणुयान्नित्यमाख्यानं परमाद्भुतं । प्रदो
षे शिवपूजांते कथयेद्वा समाहितः । न कदाचित्तस्य दारिद्र्यं जन्मांतरगतेष्वपि । स्यान्नैश्वर्यसमायुक्तो सोंते शिवपदं व्रजे
वै त् । येद्राप्य दुर्लभतरं मनुजाः शरीरं कुर्वंति सांबपदमीश्वरपादपूजां । धन्यास्त एव निजपुण्यजितत्रिलोकास्ते
षां पदांबुजरजो भुवनं पुनाति ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे प्रदोषपूजार्णवे नमाहात्म्यं नाम सप्तदशो
ध्यायः ॥ श्रीसांबसदाशिवचरणांबुजार्पणमस्तु ॥ छ ॥ छ ॥ सूत उवाच ॥ नित्यानंदमयं शांतं नि
र्विकल्पं निरामयं । शिवतत्त्वमनाद्यंतं ये विदुस्ते परंगताः । विविक्ताः कामभोगेभ्यो ये च कुर्वंत्यहैतुकीं । भक्तिं परां शिवे
धीरास्तेषां मुक्तिर्नसंसृतिः । विषयानभिसंधाय ये कुर्वंति शिवे रतिं । विषयैर्नाभिभूयंते भुंजानास्ते फलान्यपि
येन केनापि भावेन शिवभक्तिरतो नरः । न विनश्यति कुत्रापि भोगे नापि परां गतिं । आरुरुक्षः परं स्थानं विषया स्वस्थे

बं. मक्षमः पूजयेत्कर्मणा शंभुं नोगोनेशिवमाप्नुयात् अशक्तः कश्चिदुत्तरस्मे प्रायो विषयवासना अतः कर्मम
३९ यी पूजा कामधेनुः शरीरिणां मायामयेपि संसारे यश्चिद्द्वस्यपरं सुखं मुक्तिमिच्छेन्न देहान्ते तेषां धर्मो यमीरितः
शिवपूजा सदा कार्या हेतुः स्वर्गापवर्गयोः सोमवारविशेषेण प्रदोषादि गुणैर्युतं केवलेनापि ये कुर्युः सोम
वारे शिवार्चनं न तेषां विद्यते किंचिदिहामुत्र च दुर्लभं उपोषितः शुचिर्भूत्वा सोमवारे जितेंद्रियः वैदिकैर्लौकि
कैर्वापि विधिवत्पूजयेच्छिवं ब्रह्मचारी गृहस्थो वा कन्या वापि सभर्तृका विभर्तृका वा संपूज्य लभते वरमीप्सि
तं अत्राहं कथयिष्यामि कथां श्रोत्रमनोरमां श्रुत्वा सर्वाधियः शंभोर्भक्तिं कुर्वंति निश्चलां आर्यावर्ते नृपः कश्चि
दासीत् धर्मभृतां नरः चित्रवर्मेति विख्यातो धर्मराजो दुरात्मनां शास्ता धर्मसेतूनां रक्षिता दुष्पथगामिनां यष्टा स
रा कलयज्ञानां त्राता सकलकर्मिकृतां कर्ता सर्वत्र पुण्यानां दाता सकलसंपदां जेता सपत्नवृंदानां भक्तः शिवमुकुं ३९
दयोः सानुकूलः स्वपत्नीषु पुत्रमेकं न लब्धवान् चिरं प्रार्थितो लेभे कन्यामेकां मनोरमां स लब्ध्वा तनयां दिष्ट्या
हिमवानिव पार्वतीं आत्मानं देवसदृशं मन्ये पूर्णमनोरथं स एकदा जातकज्ञानाहूय सर्वान् द्विजवरान् समुत्सुकान्

कुतूहलेनाभिनिविष्टचेताः पप्रच्छ तस्या जननेफलानि अथ तत्राब्रवीदेको बहुज्ञो द्विजसत्तमः
एषा सीमंतिनी नाम कन्या तव महामते उमेव मांगल्यवती दमयंतीव रूपिणी भारतीव कलाभिज्ञा लक्ष्मी
रिव गुणान्विता रूपजारे यमानेव जानकीव धृतव्रता रविप्रभेव सत्कांतिश्चंद्रिकेव मनोरमा दश
वर्षसहस्राणि सह संत्रीप्रमोदते प्रसूत तनयानष्टौ परं सुखमवाप्स्यति इत्युक्तवंतं नृपतिर्धनैः संपू ज्य तद्द्विजं
अवाप परमप्रीतिं तद्वागमनसंचया अथान्योपि द्विजः प्राह धैर्यवानस्थविशंकितः एषा चतुर्दशे वर्षे वैधव्यं प्राप्
स्यसि इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरं मुहूर्तमभवद्राजा चिंताव्याकुलमानसः अथ स
र्वान्समुत्सृज्य ब्राह्मणान्वरधीमान् सर्वं दैववशं मत्वा निश्चिंतः पार्थिवोभवत् सापि सीमंतिनी बाला
क्रमेणागतशैशवा वैधव्यमात्मनो भावि शुश्रावाक्तसखीमुखात् परं निर्वेदमापन्ना तदाकर्ण्य सखी स्मि

ता याज्ञवल्क्यमुनेः पत्नीं मैत्रेयीं पर्यपृच्छत मातस्त्वच्चरणांभोजं प्रपन्नास्मि भयाकुला सौभाग्यशास
३९ नं कर्मैतं मां शंसितुमर्हसि इति प्रपन्नां धन्यपतेः कन्यामाह मुनेः सती शरणं व्रज तन्वंगी पार्वतीं शिवसं
युतां सोमवारे शिवं गौरीं पूजयस्व समाहिता उपोषिता च सुस्नाता विरजांबरधारिणी यतवाग्निश्चलम
मतिः पूजां कृत्वा यथोचितां ब्राह्मणान्भोजयित्वा शिवसंपूर्णप्रसादयेत् पापक्षयोभिषेकेण साम्राज्यं पी
ठपूजनात् धूपदानेन सौभाग्यं कीर्तिर्दीपप्रदानतः नैवेद्येन महाभोगं लक्ष्मीस्तांबूलदानतः धर्मार्थ
काममोक्षाणां प्राप्तिः सर्ववर्तिनिश्चितं अष्टैश्वर्यादिसिद्धीनां जपात्सर्वं हि साधनं होमेन सर्वकामानां स
मृद्धिरुपजायते सर्वेषामपि देवानां तुष्टिर्ब्राह्मणभोजनात् इत्थमाराधयन्तीं त्वं सोमवारे शिवा ३९
न्वितं प्राप्ताश्च दुःखसंपदं विपद्भिर्नाभिभयस्व घोरान्वस्वार्थं प्रपन्नापि महाक्लेशं भयावहं शिवपूजाप्रभा
वेणातरिष्यसि महद्भयं इत्थं सीमंतिनीं सम्यक् अनुशास्य मुनेः सती याप्यैः सपि वराश्च रेहाराजपुत्रीतया

करोत् दमयंत्यां नकस्यासीदिंद्रसेनाह्वयः सुतः तस्य चंद्रांगदो नाम पुत्रोभूच्चंद्रसन्निभः चित्रवर्मो नृपः श्रेष्ठस्त
मादृयन् पात्मजं कन्यां सीमंतिनीं तस्मै प्रायच्छद्गुर्वनुज्ञया सोभूत्महोत्सवस्तत्र तस्या उद्वाहकर्मणि यत्र सर्वम
हीशानां समवायो महानभूत् तस्याः पाणिग्रहकाले चिरं शंभ्रंद्रांगदः इती उवास कतिचिन्मासांस्तत्रैव श्वशु
रालये एकदा यमुनां तर्तुं स राजतनयो बली आरुरोहतरीं कैश्चिद्वयस्यैः सहलीलया तस्मिंस्तरतिकौ
लिंदीं राजपुत्रो विधिवेशात् ममज्जुर्हसकैव नैरावर्तो निहतो नरिः हाहेति शब्दः सुमहानासीत्तस्यां तटद्वये
पश्यतां सर्वसैन्यानां प्रलापोदिवमस्पृशत् मग्नं तोमिमिरे केचित्केचिद्ग्राहोदरंगताः राजपुत्रो दयकौचिन्ना
दृश्यंत महाजले तदुपश्रुत्य राजर्षिश्चित्रवर्मातिविह्वलः यमुनायास्तटं प्राप्य विचेष्टः समपद्यत॥ श्रुत्वा तद्वृत्तं
पत्न्यश्च बभ्रमुर्गतचेतनाः सा च सीमंतिनी श्रुत्वा पपात भुवि मूर्छिता तथान्ये मात्यमुख्याश्च नायकाः सपुरोहि
ताः विह्वलाः शोकसंतप्ताः विक्लवमुक्तमूर्द्धजाः इंद्रसेनोपि राजेंद्रः पुत्रवार्तां स शुश्रुवान् आकर्ण्य सह पत्नी

ब्रं. डं. भिर्नेदुःखसंतप्तः पपात ह तन्मंत्रिगणभृत्यपौराः कथालदेशवासिनः आबालवृद्धा वनिताश्च शुश्रुवुः शोकविह्व
३६ लाः शोकार्तैश्चिदुरोजघ्नुः शिरो जघ्नुश्च केचन हा राजपुत्र हा तात क्वासि क्वासीति बभ्रमुः एवं शोका
कुलादीनामिंद्रसेनो महीपतिः नगरं सहस्राक्षस्य चित्रवर्मपुरं तथा अपरेद्युः समाश्वस्तश्चित्रवर्मा
महीपतिः शनैर्नगरमागत्य सांत्वयामास तान्प्रजाः स राजा भ्रसितमग्नस्य जामातुस्तस्य बान्धवैः आगतैः का
रयामास सकलं चौर्ध्वदैहिकं सा च सीमंतिनी साध्वी भर्तृलोकभयात्सती पित्रा निषिद्धा स्नेहेन वैधव्यं
प्रत्यपद्यत मुनिपत्न्युपदिष्टं यत्सोमवारव्रतं शुभं न तत्साजहौ शुभाचारा वैधव्यं प्राप्य वत्स्यपि एवं चतुर्दश
वर्षे दुःखं प्राप्ता सुदारुणं ध्यायंती शिवपादाब्जं कोऽपि स्वगेहे वतिष्ठवान् पुत्रशोकार्त्यान्मनतमिंद्रसेनं म ३६
हीपतिं प्रसह्य तस्य दायादा राज्यं जह्रुरोजसा हृतसिंहासनः शत्रैर्दायादैः स नृपः निगृह्य का
राभवने सपत्नीको निवेशितः चंद्रांगदः पितृतु त्रिनिमग्नो यमुनाजले अधोधो निपतन्नेको ददर्शोर

तामनीः तत्र क्रीडानुसक्तास्ता दृष्ट्वा राजकुमारकं विस्मितास्तमथो निन्युः पातालं पन्नगालयं स नीयमा
नः सह ताः पन्नगीभिर्नृपात्मजः तक्षकस्य पुरं रम्यं विवेश परमाद्भुतं सोऽपश्यद्राजतनयो देवेंद्रनगरोपमं महार
त्नमणिभ्राजन्मयूखैः परिवीजितं वज्रवैदूर्यविद्रुमप्रासादशतसंकुलं माणिक्यगोपुराट्टालमुक्तादामाभि
शोभितं चंद्रकांतस्थलं रम्यं हेमद्वारकपाटकं अनेकशतसाहस्रमणिदीपविराजितं तत्रापश्यत्सभामध्ये
निषण्णं परमासने तक्षकं पन्नगाधीशं फणानेकशतोज्ज्वलं पीतांबरधरं दीप्तरत्नकुंडलमंडितं फणामणिस
हस्राढ्यैरसंख्यैः पन्नगोत्तमैः उपासितं प्रांजलिभिर्भिन्नालंकारभूषणैः रूपयौवनमाधुर्यविलासगतिशोभि
ना नागकन्यासहस्रेण समंतात्परिवारितं दिव्याभरणशोभांगं दिव्यचंदनचर्चितं कालाग्निमिव दुर्धर्षं ते
जसादित्यसन्निभं दृष्ट्वा राजसुतो धीरः प्रणिपत्य सभातले उत्थितः प्रांजलिस्तस्थौ तेजसा दीप्तकातरः
नागराजोऽपि तं दृष्ट्वा राजपुत्रं मनोरमं कोऽयं कस्मादिहायात इति पप्रच्छ पन्नगीः ता ऊचुर्यमुनातोये दृष्टोऽस्मा

स्कं.ब्रं.खं. मिथिदृष्ट्या अज्ञातकुलनामानमानीतं तवसन्निधिं अप्राक्षे राजपुत्रो सौक्षणेन महात्मना तस्याश्रित
नयः कस्त्वं कोदृशः कथयस्वमे राजपुत्रउवाच अस्तिभरमंडले कश्चिद्देशाधिपः पसंड्रुकः तस्याधीशाम
३२ राजन्तकोनाम महायशाः स्वपुण्यार्कोतिसंक्षितिपो दमयंत्यापतिः प्रभुः तस्यासीदिंद्रसेनाख्यः पुत्रस्तस्य
महात्मनः चंद्रांगदइतिनाम्नाहंनवोढाश्वशुरालये विहरन्यमुनातोये निमग्नोदैवयोगतः एताभ्यः प
न्नगस्त्रीभिरानीतोस्मितवांतिकं दृष्ट्वांस्तवपादाब्जं पुण्यैर्जन्मांतरार्जितैः अद्यधन्योस्मिधन्योस्मि
कृतार्थौपितरौमम यत्प्रेक्षितोहंकारुण्याच्चयासंतोषितोपिच सूतः इत्युदारमसंभ्रांतंवचस्तस्यातिपेशलं
तक्षकः पुनरोत्सुक्याद्बभाषेन्नपनंदनं तक्षकउवाच भोभोनरेंद्रतनय माभैषीर्धीरतांव्रज सर्वदेवेषुको
देवोयुष्माभिः पूज्यतेसदा राजपुत्रउवाच योदेवः सर्वभूतेषुमहादेवइतिस्मृतः पूज्यतेसहियुष्माभिशि राम
वोस्माभिरुमापतिः यस्यतेजोंशरूपेणरजसाचप्रजापतिः धृतरूपः सृजतिविश्वंसनः पूज्योमहेश्वरः य ३२

स्यांशसात्विकंविष्णुर्बिभर्तिविश्वंसनातनं विश्वंबिभर्तिपूतात्माशिवः सोस्माभिरिज्यते यस्यांशात्तमसोद्रिक्तो
रुद्रः कालाग्निसन्निभः विश्वमत्तिहरस्तेनसपूज्योस्माभिरीश्वरः योविधाताविधातुश्चकारणस्यापिका
रणं तेजसांपरमंतेजः सशिवोनः परागतिः सांतिकस्थोपिदूरस्थोमायोपहतचेतसां अपरिच्छिद्यमाना
सोसशिवोनः परागतिः योग्नौतिष्ठतियोभूम्यांयोवायौयोसलिलेपियः यआकाशेपिविश्वात्मासनः पूज्यः
सदाशिवः यः साक्षीसर्वभूतानांयआत्मस्थोनिरंजनः यस्येच्छावशगोलोकः सोस्माभिः पूज्यतेशिवः यमे
कमाद्यंपुरुषंपुराणं वेदांतवेद्यंगुणवेदितरोपि स्वेन्यकर्मेकथतुरीयमन्ये कूटस्थमन्येसशिवोगतिर्नः यन्न
यशास्त्रनमोचिंत्यनतर्कदूरंतधीमानमनःस्वरूपं मनोवचोवत्तुयआत्मभाव्यं सएवपूज्यः परमः शिवोनः य
स्यप्रसादं प्रतिलभ्यसंतो यांकांक्षितेर्वैदपदंमकऊंवा निस्तीर्णकर्ममार्गकर्मचक्रेकोकश्चरंत्यभीताः सशिवोग
तिर्नः यस्यामृतेसकलो रुजोविधातुस्सर्वः करोत्यपिचमोक्षपदंददाति यस्यस्वरूपमखिलंश्रुतिभिर्वि

श्रं.
३८ न्मध्यं तस्मै शिवाय सततं करवाम पूजां यान्मूर्ध्नि लब्धनिलया सुरलोकसिंधुर्यस्यांगसक्ता भगवती जगदीश
कांता यत्कुंडले वासुकितक्षकौ द्वौ यत्कंठभूषा गरलं कराले यद्भालनेत्रो ज्वलनः प्रचंडः सोऽस्माभिरीड्योऽर्ध
शशांकमौलिः जयति निगमचूडाग्रेषु यस्यांघ्रिपद्मं जयति सदसि नित्यं योगिनां यस्य कीर्तिः जयति
सकललोकायस्य मर्त्तोभिरामा स विजितगुणवर्गः पूज्यते स्माभिरीशः सूत उवाच इत्याकर्ण्य वचस्त
स्य तक्षकः प्रीतिमानसः जातभक्तिर्महादेवे राजपुत्रमभाषत परितुष्टोस्मि भद्रं ते नरराजेंद्रनंदन बालो
पि यत्परं तत्त्वं वेत्सि सर्वं परात्परं एष रत्नमयो लोकः एताश्चारुशिलाबलाः एते कल्पद्रुमाः सर्वे वाप्यामृ
तरसांभसः नात्र मृत्युभयं घोरं न जरा व्याधिपीडनं यथेष्टं विहराजेव भुंक्ष्व भोगान्यथेप्सितान् इत्युक्तो शिव.
नागराजेन नरराजेंद्रकुमारकः प्रत्युवाच परं प्रीत्या नागराजमुदारधीः इतदारोस्म्यहं काले सुव्रतागेहिणी ३८
मम शिवपूजापरो नित्यं पिता वै कृपुत्रको तेनदा मामपश्यंतं मत्याशोकेन महतावृता प्रायः प्राणान्विमुच्यंते

स्वात्प्राणोस्म्यहं त्विति अतो मया बहुतिथं नात्र स्थेयं कदाचन तमेव लोकं कृपया मां प्रापयितुमर्हसि इत्युक्तवंतं न
रदेवपुत्रं दिव्यैर्वरान्नैः सुरपादपोत्थैः अवापयित्वा वरगंधवासः स्रग्वल्लीदिव्याभरणैर्विचित्रैः संतर्पयित्वा
विविधैश्च भोगैः पुनर्बभाषे भुजगाधिराजः यदा यदा मां स्मरसि त्वमग्रे तदा तदा मां विधिवद्यतेमयेति पुनः स
राजपुत्राय तक्षकोऽश्वं च कामगं नानाद्वीपसहस्रेषु लोकेषु च मनोरमं हारौ सदिव्याभरणं नानाभरणवाससां
वाहनाय ददौ चैव यक्षसंपन्नगेश्वरः तक्षकं च नाथं मे च पन्नगेंद्रकुमारकं नियुंक्त तक्षकः प्रीत्या गच्छेति विसस
र्जं तं इति नेंद्रोरगः प्रीत्या प्रगृह्य विविधं धनं अश्वं कामगमारुह्य ताभ्यां सहायि निर्ययौ सम्मूर्च्छतोदियोन्म
ज्य तस्मात्स्वनदीजलात् निजहारनतरंम्योदिव्यमारुह्य वाहनं अथास्मिन्समये तन्वी सा च सीमंतिनी स
ती स्नातुं समागमत्तत्र सखीभिः परिवारिता सा ददर्श विहरं नदीतीरे विहरंतं नृपात्मजं रक्षसा नररूपेण
नागपुत्रेण चान्वितं दिव्यकल्पलताकीर्णं दिव्यमाल्यावतंसकं देहेन दिव्यगंधेन प्रक्षिप्तं दशयोजनं तमपूर्वां
दृष्ट्वीक्ष्य दिव्याश्च मति संश्रितं जडोन्मत्तेव भीमेव तस्थौ तन्ययस्त्वलोचना तां च राजेंद्रपुत्रोसौ दृष्ट्वा पश्चामिव

ब्रं.खं. स्मरन् निर्मुक्तकंठाभरणां कंठसूत्रविवर्जितां असंयोजितसच्धम्मिल्लामंगरागविवर्जितां स्यकनीलकां
३९ जनापांगींहशांगीं शोककर्षितां तां दृष्ट्वातीयतुरगादुपविष्टः सरित्तटे तामासाद्य वरारोहामुपयच्छदमब्र
वीत् कात्वं कस्य कलत्रं वा कस्यासी तनयासती किमिदृशींगतीं बाल्येदुःसहशोकलक्षणां इतिरनेनेहसाएष्टा
सा च भूसाश्रुलोचना लज्जिता स्वयमाख्यातुं तत्सखी स्वयमब्रवीत् इयं सीमंतिनी नाम्ना स्नुषा नैषधभूपतेः चंद्रां
गदस्य महिषी तनया चित्रवर्मणः अस्याः पतिर्दैवयोगान्निमग्नोसिमहाह्रदे तेनेयं प्राप्तवैधव्या बाल्याद्दुःखेन-
शोकिता एवं वर्षत्रयं नीतं क्लेशेनातिबलीयसा अद्यैव दुर्वासरे प्राप्ते स्नातुमात्र समागता श्वशुरोस्याः सराज्ञीकं
हृतराज्यश्च शत्रुभिः बलाद्गृहीतो बद्धश्च सभार्यो तद्गृहे स्थितः तथाप्येषा शुभाचारा सोमवारे महेश्वरं सा
बिंकपरया भक्त्या पूजयत्युमकाशया स तदुवाच इत्थं सखीमुखेनैव सर्वमावेद्य सा तदा ततः सीमंतिनी प्रा ३९
ह स्वयमवनिपात्मजं कस्त्वं कंदर्पसंकाशः कोविमोतवमार्गगो देवो नरो वा सिद्धो वा गंधर्वो वाथ किन्नरः

किमर्थं सर्वं वरतां तं स्नेहवानिव पृच्छसि किं मां वेत्सि महाबाहो दृष्टवान् किमु कुत्रचित् दृष्टपूर्वं वराभासि मम त्वं स्वजनो
यथा सर्वं कथय तत्त्वेन सत्यवाचो हि साधवः सूतः॰ एतावदुक्ता नरेन्द्रस्य पुत्री सबाष्पकंठं रुचिरं रुरोद मुमोह स
द्यः पतती सखीभिर्धृता न किंचित् कथितं शुशोच श्रुत्वा चंद्रांगदः सर्वं प्रियायाः शोककारणं मुहूर्तमभवत्तूष्णीं स्व
यं शोकसमाकुलः अथाख्यास्य प्रियां तन्वीं विविधैर्वाक्यनैपुणैः सिद्धानां च वयं देवा काममगा इति सोब्रवीत् ततोस्य
कादिवादस्य पाणिग्राहेण शंकितां पुलकांकितसर्वांगीं कृत्वा कर्णे किंचिदब्रवीत् कापि लोके मया दृष्टः स तव भर्ता
वरानने त्वद्भर्ता चारणाच्छांतः स त्वद्य आगमिष्यति अपाकरिष्यते शोकं इत्युक्त्रे स्वभुवं स्थिते एतत्कथितु मायया
तस्तावस्तु: सखा वहं अत्र कार्यो न संदेहः शपामि शिवपादयोः तावद्वक्तव्यदिवसेके यं न प्रकाश्यं त्वं कुत्रचित् तत
स्तद्वचनं श्रुत्वा सुधाधाराशताधिकं संभ्रमाद्भूतनयना तमेव मुहुरैक्षत प्रेमबंधानुगुणितं वाक्यपटुरसायनं
विभ्रमोदारसहितं मधुरापांगवीक्षणं सपाणिस्पर्शाजनितं पुलकांकितविग्रहं पूर्वदृष्टानि चांगेषु लक्षणा

ब्र. खं. दिक्चरादिषु तथा वयःप्रमाणं च परीक्ष्य इमं तर्कयत एषएव गतिर्मस्या ध्रुवं नान्यो गमिष्यति अस्मिन्नेवप्र
४० सक्तं मे हृदयं प्रेमकारणं परलोकादिहायातः कथमेषेत्य रूपधृक् दुर्भगायाः कथमस्या ह्युत्तुंगस्य दर्शनं
स्वप्नायं किमनुतोत्विभ्रमोयं किमनुभ्रमः एष धूर्तोथ वा कश्चित् यक्षो गंधर्व एव वा मुनिपत्न्या यदुक्तं
मे परमापद्गतापि च व्रतमेतत्कुरु च नितस्य वा लभ्यते फलं तस्या कृतानघ सेऽयं भाग्यामम साहाद्धजा
तमः नूनं तस्य वचः सत्यं को वित्थाशीश्वरो हितं निमित्तानि च दृश्यंते मंगकानि दिने दिने प्रसन्ने पार्वती कां
ते किमसाध्यं शरीरिणां इत्थं विमर्श्यती बालां पुनश्च मुनिसंशयां लज्जानम्रमुखीं कर्णे शशंसान्य तद्योजनं
इमं वज्ञानमाख्यातुं वलिपिता शोकसंतप्तयोः गच्छामः स्वस्ति ते भद्रे स्वैर्भि सर्घुः पतिमवाप्स्यसि इत्युक्त्वाथ ४०
समारुह्य जव्येन नृपनंदनः ताभ्यां सह निजं राज्यं प्रययौ पथत लक्षणान् स पुरोपवान्याशे स्थित्वा तत्कापिपु
त्रकं चिरंत्रस जोत्सहायासान्निहास्तनगतान्प्रति सगत्वा वा कताननशीघ्रमिंद्रसेनं पितुं च्यतां चंद्रांगदः सरस्य

सुतो प्राप्तोयं पन्नगालयात् नष्टो नो विमुं(स) चं नु भवंतो जीवितैषिणः नो चेच्चंद्रांगदस्याशु बाणैः प्राणान्हरिष्यति स म
न्मोयमुनातोयेगत्वा तक्षकमंदिरं लब्ध्वा च तस्य साहाय्यं पुनर्लोकमिमं गतः इत्याख्यातमशेषेण तद्वृत्तांतं निशम्य ते
साधु साध्विति वैतोतः शशंसुः परिपंथिनः स चंद्रसेनाय निवेद्य सत्वरं नरस्यपुत्रस्य पुनःसमागमं सनिर्ययौ प्रा
प्य नरेश्वरासनं दायादमुख्याश्च भयं प्रपेदिरे अथ पौरजनाः सर्वे पुराव्याने नृपात्मजं दृष्ट्वा राजेंद्रुतं वाचुल्ले
भिरं चपरं मुदं आकर्ण्य पुत्रमायांतं राजानं रजलाप्लुतः नाजानात्वमिमं लोकं राज्ञी च परया मुदा अथ नागरिकाः
सर्वे मंत्रिवृद्धाः पुरोहिताः प्रत्युद्गम्य परिष्वज्य तमानिन्युर्नृपात्मजं अथोत्सवेन महता प्रविष्टो नृपमंदिरं राज
पुत्रः स्वपितरौ ववंदे बाष्पमुत्सृजन् तं पादमूले पतितं स्वपुत्रं वीक्ष्य वा सो पृथिवीपतिः स्वयं प्रबोधितो मात्यजनैः
कथंचिदुत्थाय स संक्रिन्न हर्षः स्वकलिंगे क्रमेण मातृरभिवंद्यतामिर्विवर्धितो प्रणया कुलैभिः आलिंगिताः
पौरजनानशोषान्न संभावयामास सराजसूनुः तेषां मध्ये समासीनः स्वर ×शीः× तानमशेषतः पित्रे निवेद

ब्रं॰सो॰ यामास तस्य कस्य चिन्मित्रतां दत्तां भुजगराजेन रत्नानि धनसंचयं दि[illegible]व्यतम्भ्यमानीतं पित्रे सर्वं न्यवेदयत् रा
४२ जात्मपुत्रचरितं दृष्ट्वा स्पष्टा च विस्मितः मेने स्नुषायाः सौभा[illegible]ग्यं महेशाराधनार्जितं सोमांगदस्य
मयीं वर्त्तां चारैर्निषधभूपतिः इमां निवेदयामास चित्रवर्माम्हीभुजे अत्रैमां नृपतिर्वार्त्तां समुत्थाय स
संभ्रमात् तस्यौ रत्नाधनं भूरि ननर्तानंदविह्वलः अथाहूय सतनयां परिष्वज्याश्रुलोचनः भूषणैर्भूष
यामास त्यक्तवैधव्यलक्षणां अथोत्सवो महानासीद्राष्ट्रग्रामपुरादिषु सीमंतिनीं रूपाचारां शशंसुः
सर्वतो जनाः चित्रवर्मापि नृपतिः समाहूयेंद्रसेनजं पुनरुद्वाहविधिना तस्मै न्यवेदयत् चंद्रांगदो
पि रत्नौघैरानीतैस्तक्षकालयात् स्वां पत्नीं भूषयामास स्वानामपि दुर्लभैः अंगरागेण दिव्येन तत्तकोत्त ४२
नशोभिना शुशुभे सा सुगंधेन दशयोजनगंधिनी मालया म्लानगंधिन्या हेममौक्तिकवर्णया कल्प
दुमोत्थया बाला शरद्भिर्भूषिता सती एवं चंद्रांगदः पत्नीं समवाप्य समये शुभे ययौ स नगरं भूयः श्वशर

णानुमोदितः इंद्रसेनोपि राजेंद्रो राज्ये स्थाप्य स्वमात्मजं तपसा शिवमाराध्य लेभे संयमिनां गतिं दशवर्ष
सहस्राणि सीमंतिन्या स्वभार्यया साकं चंद्रांगदो राजा बुभुजे विषयान्बहून् प्रासूत तनयानष्टौ कन्यां च
कां वरानना रेमे सीमंतिनी भर्त्रा पूजयंती महेश्वरं विचित्रमिदमाख्यानं मया समनुवर्णितं भूयोपि
वक्ष्यमाहात्म्यं सोमवारव्रतोदितं २५० ७ इति श्रीस्कंद॰ ब्रह्मो॰ सोमवार व्रतमहिमानुवर्णनं ना
माष्टमोध्यायः श्रीः ~~सूत उवाच~~ ऋषय ऊचुः साधुसाधु महाप्राज्ञ त्वया कथितमुत्तमं आख्यानं
पुनरन्यद्वापि चित्रं वक्तुमर्हसि सूत उवाच विदर्भविषये पूर्वमासीदेको द्विजोत्तमः वेदमित्र इति ख्यातो वे
दशास्त्रार्थतत्त्ववित् तस्यासीत्परमं मित्रं सखा सारस्वताह्वयः तावुभौ परमस्निग्धावेकदेशविनिवा
सिनौ वेदमित्रस्य पुत्रोभूत्सुमेधा नाम नामतः सारस्वतस्य तनयः सामवानिति विश्रुतः उभौ स
वयसौ बालौ रूपेण च समाकृती समं च कृतसंस्कारौ समविद्यौ बभूवतुः सांगान्वेदानधीयानौ तौ वेदा
न्तकं व्याकरणानि च इतिहासपुराणानि धर्मशास्त्राणि कृत्स्नशः सर्वविद्यासु निष्णातौ बालकौ स

ब्र॰ खं॰ मधिरास्तौ प्रहर्षमतुलं पित्रोर्ददतुः सकलैर्गुणैः तौ चकृतास्वतनयौ तावुभौ ब्राह्मणोत्तमौ आह्वय
५२ वाचतां प्रीत्या षोडशाब्दौ शुभाकृती हे पुत्रकौ युवां बाल्ये कृतविद्यौ समर्चयौ वैवाहिकोयं समयो यु
वयोर्वर्ततेसमः इमं प्रसाद्य राजानं विदर्भेशं स्वविद्यया ततः प्राप्य धनं भूरि कृतोद्वाहौ भविष्य
तः एवमुक्तौ सुतौ ताभ्यां तावुभौ द्विजनंदनौ विदर्भराजमासाद्य पर्यतोषयतां गुणैः विद्यया परि
तुष्टाय तस्मै द्विजकुमारकौ विवाहार्थं कृतोद्योगौ धनहीनावशंसतां तयोरभिमतं ज्ञात्वा स विदर्भ
भुवः पतिः प्राहस्य किंचित्प्रावाच लोकतत्वविचित्तया इतो निषधराजस्य राज्ञी सीमंतिनी सती
सोमवारे महागौरीं पूजयत्यंबिकायुतं तस्मिन्नहनि सपत्नीकान् द्विजाग्र्यान्वेदपारगान् संपूज्य पर शिव
या भक्त्या धनं भूरि ददाति च अतो त्र युवयोरेको नारीविभ्रमवेषधृक् एकस्तस्याः पतिर्भूत्वा ५२
यतां विप्रदंपती युवां वधूवरौ भूत्वा प्राप्य सीमंतिनीगृहं भुक्त्वा भूरि धनं लब्ध्वा पुनर्यातं ममांतिकं

श्रुत्वा इति राज्ञा समादिष्टौ भीतौ द्विजकुमारकौ प्रत्यूचतुरिदं कर्म कर्तुं नो जायते भयं देवतासु गुरौ पित्रोः स्व
था राजकुलेषु च कौटिल्यमाचरन्मोहात्सद्यो नश्यति सान्वयः कथमेतद्गृहं राज्ञां छद्मना प्रविशा
वः गोप्यमानोपि यः कश्चित्कदाचित्ख्यातिमेष्यति यद्गुणास्ताहिता पूर्वशीलाचारगुणादिभिः स
द्यस्ते संक्षयं यांति कौटिल्यपथगामिनां छद्मनामागते प्राप्ते नानातिष्ठत्वेवाहि नित्यशः अत आवां श्रु
ताचारौ राजानौ कुलिनां कुलौ वर्तंते धूर्ते जनश्लाघ्यं नाश्रयावः कदाचन राजोवाच देवतानां गु
रूणां च पित्रोश्च पृथिवीपतेः शासनस्यास्य लंघ्यस्य प्रत्यादेशो न कर्हिचित् एतैरुक्तैः समादिष्टो शु
भं वा यदि वाशुभं अतो मच्छासनं कार्यं भवद्भ्यामविलंबितं इत्युक्तो नरदेवेन तौ तथेत्यूचतुस्ततः या
त सारस्वतस्य तनयं सामवंतं नराधिपः स्त्रीरूपधारिणं चक्रे वस्त्रकल्पीजनादिभिः आल
क्रियोपरचनकेशबंधः प्रयुक्तकर्णाभरणांगरागः स्निग्धांजनाभिः स्पृहणीयरूपो बभूव सद्यः प्र

ब्रं.खं. महोत्तमाभ्यां तावुभौ दंपतिभिर्द्विजपुत्रोन्यपाहूय जग्मतुर्निषधं देशं यद्वा तद्वाश्रयेर्षिणी उपनीतौ राजसदनं सोमप्रभा
४३ देसह द्विजैः सपत्नीको स्नातातिथ्यो धौतपादो बभूवतुः साध्वी ब्राह्मणान्सर्वानुपतिष्ठन्वरासने प्रत्येकमने
यौ चंद्रां सपत्नीकान्द्विजोत्तमान् तोषयित्वा प्रसुतो दृष्ट्वा प्राप्तो क्षत्रिम दंपती तत्र सा किंचिद्विहस्याथ मेनगौरीम
हेश्वरौ आवाभ्यां द्विजमुख्येषु स्वदयं सदाशिवं पत्नीभावे ह्याभासं देवी च जगदंबिका गंधमाल्यैश्च सरीन
दीपैर्नीराजनादिभिः अर्चयित्वा द्विजश्रेष्ठान् नमश्चक्रे समाहिता हिरण्मयेषु पात्रेषु पायसं घृतसंयुतं शाके
रामधुसंयुक्तं शाकैर्जुष्टं मनोरमैः गंधमाल्यादनेहृद्यैर्मोदकापूपराशिभिः शष्कुलीभिश्च संयावैः फलरसोपप
न्नकैः तथान्यैरथ सस्याकैर्भक्ष्यभोज्यमनोरमैः सुगंधैः स्वादुसंयुतैः पानीयैरपि शीतलैः भोजनमन्नं द्विजाति
भ्यो सा भक्त्या पर्यतोषयत् भुक्तवत्सु द्विजाग्र्येषु स्वाचांतेषु नृपांगना प्रणम्य दत्वा तांबूलं दक्षिणां च यथार्हतः
चनरास्य एव वासांसि रत्नानि भूषणानि च दत्वाथ प्रानमत्तस्याविसर्जद्द्विजोत्तमान् तयोस्तथा तद्द्विजाग्र्य पुत्रयो ४३
रेकस्तथा हेमवतीधिया वितः एको महादेवधिया भिपूजितः कृतप्रणामो ययतुस्तदालयात् आवास्य भ्रमताग्नि

रिजो यस्तथा पूजितः परं स सामवान्द्विजस्ततो बभूव प्रमदोत्तमा सा तु विस्मृतपुंभावं तस्मिन्नेव द्विजोत्तमे जातस्पृहा तदो
त्सिक्ता कंदर्पविवशाब्रवीत् रहिनार्थविशाकोश्मसमावयवसुंदर तिष्ठ तिष्ठ क्षयासीमां --- रमनश्यसि ते प्रिया इहैव
मन्येवनेरम्यसपुष्पितलतारते अस्मिन्निहमुक्ताम्के मिक्षमिरयासह यथासुखं इत्युक्तं तयोक्तमा कण्यपुरोगस्वद्वि
जोत्तमः त्यक्तित्यपरिहासोक्तिं गच्छतिस्म यथापुरा पुनरप्याह सा बालातिष्ठ तिष्ठ क्षयास्यसि इत्युक्तवसरावेराप
रिभूयैतां पश्यमां परिष्वजस्व मां कांतपाययस्वमम्माधरं नाहं गंतुं समर्थास्मि स्मरबाणेन पीडिता इत्युक्तं समभ्य
तं पूर्वं निरात्म्य परिशंकितः आयांतं पृष्ठतो वीक्ष्य सहसा विस्मयं गतः एषा पद्मपलाशाक्षी पीनोत्तुंगपयोधरा ह
शोदरी बृहच्छ्रोणी नवपल्लवकोमला सत्यमेमसखा किन्नु जाता एवं वरांगना एकाम्येनमतः सर्वे स्मितिसंचिंत्य सो
ब्रवीत् किमपूर्वमिवाभासि सखेरूपगुणादिभिः अपूर्वभाषसे वाक्यं कामिनीवमदाकुला यस्त्वं वेदपुराणज्ञो
ब्रह्मचारी जितेंद्रियः सारस्वतस्य तनयः कथमेनं प्रभाषसे इत्युक्तेसा पुनः प्राह नाहमस्मि पुमान्प्रभो नाम्नासाम
वती वो कातयास्मि रतिदायिनी यदि ते संशयः कांत ममांगानि विलोकय इत्युक्ते सहसा मार्गे रहस्य नांतिके कयत

ब्रं०खं० ताम्रकृत्रिमधम्मिल्लजघनस्तनशोभिनी सुरूपां वीक्ष्य सा मेने किंचिद्व्याकुलमानसा पुनः संस्तभ्य यत्नेन तेन सो
४४ विलासिनीं नृपः मद्भर्तृविस्मयाविष्टेनाकिंचित्समभाषत गतस्तेसंशयः कृष्णितस्त्वांगच्छ रमस्व मां सुमेधाउवाच मैवं
कथयमयीरामावदीस्त्वं तु मनतवृत आवां विज्ञानशास्त्रार्थौ लमेवं प्राप्तसेकयं अपितस्यच शास्त्रस्यापि विवेक
स्यकुलस्य च किमेषसदृशोधर्मो राजमार्गनिषेविणां नत्वं स्त्रीपुरुषोविद्वान् ज्ञानात्मात्मानमात्मना सर्वथा
नोचितंकर्मत्वंणांश्रेयोविनाशनं यस्त्वंपिप्रातभजाविद्वानुगंतास्त्रीत्वमर्हितं मागंस्यकागतोरण्यनरोविध्यतवं
टकैः बलाद्विश्वितवाहिंस्त्रैः सरात्युतस्मागमः एवंविवेकमाश्रित्य तस्मीमिहस्वकंगृहं स्यद्विजप्रसारनस्य
स्त्रीत्वं नवविलीयसे अथवैदैवयोगेन स्त्रीत्वमेव भवेत्तव पितारस्तामयासार्धं रमस्वसवरवर्णिनी अहोचित्र
महद्दुःखं महोमायाबलंमहत अहोराजप्रभावेमावाय शिवाराधनसंभवः इत्युक्त्वाथसद्दत्तेन समाचप्रस्मरदु ४५
षिता बलेनतं समालिंग्यचिरंसाधरपल्लवं चुचुंबनापितया धीरः सुमेधा नतनोस्त्रियं यत्नादानीयसदनंत्
स्नेततत्रन्यवेशयत् तदाकर्ण्याथतौ विप्रौ कुपितौ शोकविह्वलौ ताभ्यां सहैव बालाभ्यां वेदरतस्यांतिके ययुः तत्र

सारस्वतः प्राहराजानं धर्मवेदिनं राजन्ममात्मजंपश्य नवशासनयंत्रितं एतोवदाज्ञावशगोचक्रतुः कर्म्मगर्हितं ॥
मत्पुत्रस्तत्कृतेपुंस्त्वं स्त्रीत्वंप्राप्तजुगुप्सितं अथमेसंततिर्नष्टा निराशाः पितरो मम नापुत्रस्य च लोकोस्ति लु
प्तपिंडोस्य संस्रुतौ शिखोपवीतमजिनं मौंजीदंडकमंडलुं ब्रह्मचर्योचितंधर्मं विहायमास्रमागतः ब्रह्मसूत्रंसा ५
वित्रींस्नानसंध्याजपार्चनं विसृज्य स्त्रीत्वमापन्नस्य कागतिर्वद पार्थिव अयमेसंततिर्नष्टा नष्टोदेवपथाश्रमे ए
कात्मजस्य मेराजन्कागतिर्वदयाश्चिती इति सारस्वतेनोक्तं वाक्यमाकर्ण्य भूपतिः सीमंतिन्याः प्रभावेन ।अविस्म
यंपरमंगतः अथसर्वान्समाहूय महर्षीन्मितद्युतिः प्रसाद्य प्रार्थयामास तस्यापुंस्त्वं महीपतिः तेत्रुवन्नयपार्व
त्याशिवस्य च समीहितं नकृतान्नावसंकल्पं कोन्यथा कर्तुमीश्वरः अथराजा भरद्वाजमाहायमुनिपुंगवं ताभ्यां
सहद्विजाभ्यां तस्मै ताभ्यां समीहितः अंबिकाभवनंप्राप्य भारद्वाजोपदेशतः तोरद्धींनियमैस्तोत्रैरूपास्तम
दिवानिशं एवंत्रिरात्रंसविरस्तभोजनो जपार्चनध्यानरतो महीपतिः सोम्यकूपमणामेविविधेभ्यःसंभावेगौरींप्र
पन्नार्तिहरामतोषयत् ततःप्रसन्नास्पारवी भक्तस्य पृथिवीपतेः स्वरूपंदर्शयामास चंद्रकोटिसमप्रभं अ

ब्रं खं॰ थाह गौरी राजानं किं ते भीष्टं वरं वद सोप्याह पुत्रमायुष्यं रूपयादीयतामिति भूयोप्याह महादेवी मद्भक्तैः मद्भ
४५ कर्म यत्कृतं शक्यते नान्यथाकर्तुं वर्षायुतशतैरपि राजोवाच एकात्मजो हि देवेंद्र यं कर्मणा न स्वसंततिः कथं स
स्वप्रपद्येत विना पुत्रेण नादृशः अंबिकोवाच तस्यान्यो मत्प्रसादेन जनिष्यति सुतो नमः विद्याविनयसंपन्नो दी
र्घायुर्विमलाशयः एषा सामवती नाम सुतामुष्य द्विजन्मनः भूत्वा सा भवनेश्वरस्य पत्नी कामभोगेन युज्यतां इत्यु
क्त्वांतर्दधे देवी ते च राजपुरोगमाः गत्वा स्वं स्वं गृहं सर्वे च कुर्वन्त्छास्त्रनीतितः सोपि राजा स्वस्य तः पुत्रं गुणवंतं स
तोत्तमं लेभे देव्याः प्रसादेन अचिरादेव कालतः तां च सामंतिनीं कन्यां ददौ तस्मै सुमेधसे भूसे तौ दंपती नित्यं काकं बुसु
जाते परं सुखं इत्येतच्छिवभक्तायाः सीमंतिन्या नृपस्त्रियः प्रभावः कथितं शंभोर्माहात्म्यमपि वर्णितम् भूयो
पि शिवभक्तानां माहात्म्यं पिस्मयावहं सहसा वर्णयिष्यामि श्रोतॄणां मंगलायनम् ७० इति श्री स्कंद॰ ब्र ४५
ह्मो॰ सीमंतिनीप्रभाववर्णनं नाम नवमोऽध्यायः ९ श्रीः विचित्रं शिवनिर्माणं विचित्रं शिवचेष्टितं विचि
त्रं शिवभक्तानां चरितं पापनाशनं स्वर्गापवर्गयोः सम्यक्साधनं तद्ब्रवीम्यहं अवंतीविषये कश्चिद्ब्राह्मणो मंदरा

द्रयः बलवद्विषयारामस्त्रीक्रीडाधनसंग्रही स्नानसंध्यापरित्यक्तो गंधमाल्यां जनादिभिः कुस्त्रीसक्तो कुमार्गस्थो
तथा द्यूतमहालयः सेवद्भयापिंगला नाम रम्भाणोरादिवानिशं तस्या एव गृहे नित्यं निवसन्निजितेंद्रियः कदाचित्सदन
तस्यास्तस्मिन्निवसति द्विज ऋषभो नाम धर्मात्मा शिवयोगी समाययौ तमागतमभिप्रेक्ष्य स्वपुण्यमिव मूर्तिमत् व
सो वेश्यासनृत्य प्रश्रयनम पूजया तानुसो तमारोप्य महत्पीठं कंबलांबरसंयुतं प्रक्षाल्य चरणौ भक्त्या तत्तोयं पि बत् शि
वं स्वागतार्घ्यनमस्कारगंधपुष्पाक्षतादिभिः उपचारैः समभ्यर्च्य भोजयामासतुर्मुदा तं भुक्तवंतमाचांतं पर्यंक
स्य पर्यंके उपवेश्य मुदा युक्तौ तौ वृद्धं तपस्यंतं पादसंवाहनं भक्त्या कुर्वंतौ देवचोदितौ कल्पयित्वा तु शुश्रूषां
प्रीणयामासतुश्चिरं एवं संमानितस्ताभ्यां शिवयोगी महामतिः अतिवाह्य निशामेकां ययौ प्रातस्तदाद्भुतः एवं
काले गते प्राये स विप्रो निधनं गतः सा च वेश्या मृता काले ययौ कर्माङ्कितां गतिं स विप्रः कर्मणा नीतो दशार्णाधिप
पतेः वज्रबाहोः कुटुंबिन्यां सुमत्यां गर्भमाश्रितः तां ज्येष्ठपत्नीं नृपतेर्गर्भिणीं सा बंधमाश्रिताम् अवेक्ष्य तस्य
गरलं सपत्नीछन्ना रहो सा भुक्त्वा बारं कं चारं नस्तादैवयोगतः क्लेशमेव परं प्राप्य परं भरणासीद्दुःसहं अथ का

वं.सो. केसमावनेपुत्रमेकमजीजनत् क्लेशेनमहतासाध्वीपीडितावरवर्णिनी सानिर्दिश्याराजापुत्रस्यस्यपुष्यैगरेणायत
४६ तेनाथापमहाक्लेशं कंरमानादिवानिशं सबालवैकष्टमानापि सर्वांगंव्रणपीडितो बत्सवतुरंतिक्लेशो गरया
गप्रभावतः तौनराज्ञासमानीतौवैद्यैश्चस्तनशेषजौ नत्वास्वस्थमापतुर्यदोरनेकयत्नैरपि नीतौचेतक
तिचिन्मासान्सुराजामानबालकौ जीवंतोत्नतप्रायौविलोक्य समचिंतयत् एतामेगरदायिणीपुत्रौनिरयातौ
गरुदिति मर्तुंवाजीवितंवापि नक्षमौपापभागिनौ अत्रोपायंकरिष्यामिपापयाध्रुवमेतयाः इत्थंविचिंत्यायु
सम्भ्रमिपालः स्वतःपंसेलेषुतदालजेषु आहूयस्तेनिजसारयुक्तानिर्वापयामासरथेनदूरं तौसतनपा
रित्यतौकुनश्चिदूजनेवने अथापतुःपरांपीडांक्षतादद्भ्यांपरिपीडितौ साइहंतौनिजंबालंनिपतंतीपदेपदे क्वचित्
छायंस्वेनभीताक्वचिद्व्याघ्रैरनुद्रुता भक्ष्यमानाशिशावेक्षवताकेश्चलराक्षसैः महागुल्मेषुधावंतीखिन्ना राम.
पादापुक्लौरिभिः एवंघोरमहारण्यंभ्रमंतीनृपमानिनी दैवात्प्रापवणिग्यामंगाचक्रजनरसेवितं गत्वातित्तन्नमा ४६
गासेद्दूरमपियत्नतः दृष्टैवैश्यनगरंवरस्त्रीनरसेवितं तस्यग्रामोत्तमहावैश्यानगरस्यमहाधनः आत्मप

नाकरोनामराजराजश्चापरः तस्यवेश्यपतेःकाचिन्गृहदासीवरांगना आयांतींदूरतोदृष्ट्वानीदीनकमुपाययो
सादासीनृपतेःकांतांसपुत्रांव्रणपीडितां स्वयंविदितवृत्तांतांस्वामिनंप्रत्यदर्शयत् तयाभिवेदितासापत्य
तौनःस्वमन्दिरपतिः अहोकष्टमितिध्यात्वाविनिश्वस्यमुहुर्मुहुः ४ सतांदृष्ट्वाविशीर्णांनाथोरोगार्तासापुत्रकां
नीता ४ वणिक् रहसिसत्यवक्तातद्वृत्तांतमपृच्छत सौ ४ तामंतिकेस्वगेहस्यसन्निवेश्यगृहे वासान्नपानश
यनैर्मान्यतामुपाययत् तस्मिन्नाहनृपवधूर्निवसंतीरुजार्दिता व्रणायक्ष्मादिरोगाणांनशांतिंप्रत्यपद्यत
ततोदिनैःकतिपयैःसबालाव्रणपीडिता विलोकयंतीनिषक्तत्वाममास्यरविधर्वेशात् मृतस्तत्तनयोराज्ञी
शोकेनमहताव्रता मूर्छितान्यपतद्भूमौगजेभग्नवसंसेरी रेबालसंज्ञामवाप्यथबाष्पाक्लिन्नेक्षणायथा रोदिति
तापिवणिस्त्रीभिर्विलापसुदुःखिता हानाथपुत्रहाबालकहाममप्राणरक्षक हाराजकुलकपर्णोद्धोत
ममप्राणवर्धन इमांमनाथांकृपणांत्यक्त्वान्यायमकंबांधवान् मानवेमांपरित्यज्यक्वप्रयासिनृपात्मज इत्यो

श्री॰
४७

दिभिर्दिनैस्तैर्बांधवैः शोकविह्वलैः विलपंतीं राजपत्नीं कोनुसांत्वयितुंसमः एतस्मिन्समयेतस्याः दुःखशो
कचिकित्सकः ऋषभः पूर्वमाख्यातः शिवयोगीसमाययौ सयोगीवैश्यनाथेन अर्घ्यहस्तेनपूजितः तस्याः
सकाशमागम्यशोचंतींइदमब्रवीत् ऋषभउवाच अकस्मात्किमहोरोदिषिकिंविमूढधीः कोजातःप्र
थमंलोकेकोमृतोवदसांप्रतम् अमीदेहादयोभावास्स्वप्नायफेनसमन्विताः क्षांतियांतिचक्षीणवर्द्धंतिकानिदु
ष्यंतिपुनः अतोस्मिन्नेनसदृशोदेहेपंचत्वमागते शोकस्यानवकाशःस्यान्नशोचंतिविपश्चितः गुणभेदेना
नीरज्यतेभ्राम्यतेनिजकर्मभिः कालेनायविहायवांचवासनायांचमोरते माययात्यक्तिमायांतिगुणास्सत्वा
दयास्त्रयः तैरेवदेहाजायंतेजातानांतल्लक्षणादयः देवत्वंयातिसत्वेनरजसाचमनुष्यतां तिर्यक्त्वंतम
साजंतोर्वासनानुगतोवशः संसारेवर्तमानेस्मिन् जंतुःकर्मानुबंधनात् दुर्विभाव्यंगतिंयातिसुख
दुःखमयींमुहुः अपिकल्पायुषांवत्सेदेवानामपिकल्पितः अपायःकर्मबंधानांकाकथानरदेहिनाम् राम॰ ४

केनचिद्दीतदेहस्यकाकथाइहकारणं कर्मैकेचिद्गुणान्केचिद्देहःसाधारणोमतः कालकर्मगुणाधारं
पंचात्मकमिदंवपुः जातेदृष्ट्वानहृष्यंतिनशोचंतिमृतंबुधाः अव्यक्तोजायतेजंतुरव्यक्तेचप्रलीयते मध्ये
व्यक्तंयदाभातिजलबुद्बुदसन्निभः यदागर्भेस्थापितगतोदेहविनाशःकल्पितस्तदा देवकीवाथवाजा
तोम्रियतेस्वदेसएवंगर्भस्थाएवनश्यंतेजातमात्रस्तथापरे केचिद्युवानोनश्यंतिम्रियंतेचापिवार्धके या
दृशंप्राकृतंकर्मतादृशंविंदतेवपुः भुंक्तेतदनुसारेणसुखदुःखानि ×न× तान्यसौ मायानुभावेरत
पित्रोःसुरतसंभ्रमात् देहउत्पद्यतेकोपिपुंयोषित्क्लीबलक्षणः आयुःसुखंचदुःखंचपुण्यपापंतथैवचने
कलाटलिखितंधात्रावहन्जंतुःप्रजायते कर्मणाप्राप्यतल्लब्धालोकस्यप्राप्तिस्ससतः अनित्यत्वाच्च
भावानांनशोकंकर्तुमर्हसि कस्यकेननियतंसौख्यमिहलोकेकुत्सिता कैनिसनातनास्मेघेकोनित्यंतक
कथंनवजन्मान्यतीतानिशतकोटिमितानिच अज्ञानत्यापरंतत्वंसंप्राप्तायमहाभ्रमः कस्यकस्यासि
तनयाजननीकस्यकस्यका कस्यकस्यासिगृहिणीभवभ्रमकोटिषुवर्तिनी पंचभूतात्मकोदेहोलग्नःकर्मा

ब्रंह्मो॰
८८

समाधनः मेद्य मज्ञास्थितु चिंतो विषण्ण मन्मलेषु आत्मजनः शरीरांतरमप्यापनोनि जरेहोद्भुतं मकं मत्वा स्वनन
यं मेढ माशोकं कर्तुमर्हसि यदिनाम नरः कश्चिन्मृत्युं तरतियत्नतः कथं तरनिनि परपूर्वे पूर्वे विपश्चितः तप
सा विद्यया बुध्या मंत्रौषधिरसायनैः अतियाति परं मृत्युं न च कश्चिदपि पंडितः न मूर्तिनां चैवा जंतोश्चः पर
श्चोवरानने शरणं व्रज सर्वेशं मृत्युंजय मुमापतिं तस्मादनित्य वयबनत्य शोचितुमर्हसि नित्यसानि
हितमृत्यु किं सुखं वरदेहिनां व्याघ्रपुरस्थिते ग्यासः पशूनां यदि रोचते अहो जन्म मृतं तत्तु यन्नो क्रीसि
वरानने तावन्मृत्युभयं घोरं तावद्रोगभयं जराभयं यावन्नैव न चोपैति शरणं देवी शिवपदांबुजं अनुस
यदक्षरं निःसंसारभवारारूणे मनो यदि विरज्येत तदा ध्यायन्महेश्वरं मनसापि वनो पुंसां शिवध्या
नरसामृतं भयं तृष्णा न जायते संसारविषया सर्वे विमुक्तसर्वसंगम्य मनोचरा यस्य यत्रितं यदापि
शिवपदे मग्नं तदा यात्सपुनर्भवं तस्मादिदं मनोभद्रे शिवध्यानैकसाधनं शोकमोहसमाविष्टं स्वमा कुरु ८८
षशिवं भज सूतः इत्युक्ता सानुनयं साध्वी बोधिता शिवयोगिना प्रसादाद्गुरोस्तस्य प्रणम्य चरणांबुजम्
प्र राजसुताः प्रणम्य भगवन्मत्पुत्रा यास्त्वन्नायाः पतिबंधुभिः महारोगातुरायामेका गतिमरणंविना ॥

अतोऽहं मर्तुमिच्छामि सहैव शिशुनामुना कृतार्थास्मि यदद्य त्वामपश्यं न्मरणोन्मुखी इति तस्या वचः श्रुत्वा शिवयोगी
महोदयानिधिः पूर्वोपकारं संचित्य मतस्तां तिक्रमाययौ सततदाभस्म संगृह्य शिवमंत्राभिमंत्रितं विदीर्णतन्मुखे क्षिप्त्वा
मृतं प्राणैरयोजयत् स बालकः संगतप्राणः शनैरुन्मीलयल्लोचने प्राप्त सर्वेंद्रियबलो रुरोद स्तनकांक्षया मृतस्य पुनरुत्था
नं वीक्ष्य बालकस्य तदा जना मुमुदिरे सर्वे लगरस्थ पुरोगमाः अथानंदबलाराज्ञी विद्रुकोन्मत्तविभ्रमा जयाहतन
ये शीघ्रं बाष्पव्याकुललोचना उपगम्य तदा तन्वी परमानंदनिर्वृता नैव दात्मानमन्यं च शरूषु तेषपरिभ्रमात् पुनश्च स
योगी नयोर्मृतकुमारयोः विषव्रणादिकं देहं भस्मनैव परामृशत् ततस्तद्भस्मनास्पृष्टौ प्राप्तौ दिव्यकलेवरं देवानाम
मरूप धनुः कांति भूषिते संप्राप्ते त्रिदशैश्वर्ये यस्य स्वपुण्यकर्मणा तस्मात्कुमारं प्राप्य सा राजीकुमारकः तां पादे
यानिपत्य तौ कृपणः प्रमणि कृतो उत्थाप्याभाषया मा सद्दुःखेमुत्तामु चाचह अथ प्रार्थीतिनोरतौ जीवितं शाश्वतं समाः
यावज्जीवसि लोकेस्मिन्नतावत्प्राप्स्यसे जरां एषते तनयः साध्वी भद्रायुरिति विश्रुतः ख्यातिं यास्यति लोकेस्मिन्निजं राज्य
मवाप्स्यसि अस्य चैश्य स्य नगरे नाचितिष्ठागुंविस्मितु यावदेष कुमारस्तं प्राप्नविद्यो भविष्यति सूतः इतितामथसो
यामी तं च राजकुमारकं संजीव्य भस्मवीर्येणाययोरशान्यर्थंपसतान ८० श्रीः इति श्रीस्कंदपुराणे ब्रंह्मोत्तर
खंडे भद्रायुरास्याने नाम दशमोध्यायः १० ॥ ॥ ॥ ॥ ॥ श्रीः ॥ गंगंगंगंगंगंगं ॥ श्री ॥ श्रीशंकराय०

श्रीगणेशायनमः सूतउवाच पिंगलानामयावेश्यामयापूर्वमुदाहृता शिवभक्तार्चनापुण्यात्त्यक्त्वा
पूर्वंकलेवरं १ वज्रांगदस्यसाभूयः।सीमंतिन्यामजायत रूपौदार्यगुणोपेतानाम्नावैकीर्तिमालिनी
भद्रायुरपितत्रैवराजपुत्रोवणिक्पतेः ववृधेसदनेतस्यवैश्यस्यापिमहात्मनः २ तस्यापिवैश्यनाथस्यकु
मारोनीचवोत्तमः सनाम्नासुनयःप्रोक्तोराजसूनोःसखाभवत् तावुभौपरमस्निग्धौराजवैश्यकुमारको
विक्रीडितुौरूढहारांगौरत्नकुंडलमंडितौ तस्यराजकुमारस्यब्राह्मणैःसवणिक्पतिः संस्कारान्कारयामा
सस्वपुत्रस्यापिविस्तरात् कालेकृतोपनयनौगुरुशुश्रूषणेरतौ चक्रतुःसर्वविद्यानांसंग्रहौविनयान्वितौ अ
थराजकुमारस्यप्राप्तषोडशहायने सहसाऋषभोयोगीतस्यवेश्मसमाययौ साराज्ञीचकुमारश्चशिव
योगिनमागतं मुहुर्मुहुःप्रणम्योच्चैःपूजयामासतुर्मुदा ताभ्यांसंपूजितश्चाथयोगीशोहृष्टमानसः ॥

तंराजपुत्रमुद्दिश्यबभाषेकरुणार्द्रधीः शिवयोगीउवाच कच्चित्तेकुशलंतातत्वन्मातुश्चाप्यनामयं कच्चित्सं
सर्वविद्यानांप्रकर्षःकिलसंहितः कच्चिद्गुरूणांसततंशुश्रूषापरमोभवान् कच्चित्स्मरसिमांतातत्वप्राण
प्रदंगुरुं एवंवदतियोगीशेसाराज्ञीविनयान्विता स्वपुत्रंतस्यपादयोर्निपात्येदमभाषत एषपुत्रस्तवगु
रोत्वमस्यप्राणदःपिता एषशिष्यस्त्वयाग्राह्योभवताकरुणात्मना एनंलघुभिरुत्सृष्टमनाथंपरिपालय
अस्मैसम्यक्सतांमार्गमुपदेष्टुंत्वमर्हसि इतिप्रसादितोराज्ञाशिवयोगीमहामतिः तस्मैराजकुमाराय
सन्मार्गमुपदिष्टवान् ऋषभउवाच श्रुतिस्मृतिपुराणेषुप्रोक्तोधर्मःसनातनः वर्णाश्रमानुरूपेण
निषेव्यःसर्वदाजनैः भजवत्ससतांमार्गान्मादेवचरितंचर तस्वाज्ञांविषयेथामाकार्षीर्देवहेलनं गोरक्ष
गुरुविप्रेषुभक्तिमान्भवसर्वदा चांडालमपिसंप्राप्तंसदासंभावयातिथिं सत्येनत्यजसर्वत्रप्राप्तेपि
प्राणसंकटे गोब्राह्मणार्थंवारक्षार्थंमसत्यंवावदक्वचित् परस्वेषुपरस्त्रीषुदेवब्राह्मणवस्तुषु तृष्णांत्यज

ब्रं·उ·खं
८८५०

महाराजदुर्लभेष्वपिवस्तुषु सत्कथायांसमाचारेसद्वृत्तेसत्समागमे धर्मादिसंग्रहेनित्यंत्वंश्रद्धांकुरुमहाम
ते स्नानेजपेचैवहोमेस्वाध्यायेपितृतर्पणे गोविप्रानलपूजासुनिरालस्योभवानघ क्रोधोलोभस्तथाऽसू
यापैशुन्यमसत्यमहं मत्सरंदंभमुद्वेगंयत्नेनपरिवर्जय क्षत्रधर्मोयतोनित्यंवृथाहिंसांपरित्यज शुष्कवै
रंवृथालापंपरनिंदांचवर्जय मृगयाद्यूतपानेषुस्त्रीषुस्त्रीविजितेषुच अत्यासक्तिंत्वमाकार्षीस्तथादुर्विषयेषु
च मैत्रींकुरुसत्स्वार्थेषुदुःखितेषुदयांकुरु पुण्यवत्सुचसंतोषमौदासिन्यंकुबुद्धिषु अत्याहारमतिक्रोधमति
निद्रामतिश्रमं अत्यालस्यमतिक्रीडांसर्वदापरिवर्जय भक्तिविद्यामतिश्रद्धामतिपुण्यमतिस्मृतिः अत्यु
त्साहमतिख्यातिमतिधैर्यंचसाधय सकामोनिजदारेषुसक्रोधोदुष्टशत्रुषु सलोभःपुण्यनिचयेसाभ्यसू
यास्वधर्मिषु सद्वेषोसिवयाखंडेसरागःसज्जनेषुच दुर्बोधोभवदुर्मंत्रेबधिरःपिशुनोक्तिषु धूर्तेशठमतिक्रूरे
कितवंचपलंखलं पतितंनास्तिकंजिह्मंदूरतःपरिवर्जय आत्मप्रशंसामाकार्षीःसंविज्ञातेंगितोभव कुटुंबे

पुत्रवित्तेषुनात्यासक्तःसदाभव पत्न्याःपतिव्रतायाश्चजनन्यांचतथागुरौ सर्ववस्तुषुएतेषुविश्वासंकुरुसर्वथा
आत्मरक्षाकरोनित्यमप्रमत्तोरथस्थितः विश्वासंनैवकुर्वीथातस्मन्यत्र्येष्वपिकुत्रचित विश्वास्यमावधीःकंचिदअ
पिचोरंमहामते अपापेषुनशंकेथाःसत्यान्नचलितोभव अनाथंकृपणंवृद्धंस्त्रियंबालंनिरामयं प्र
तिरक्षधनैःप्राणैर्बुध्याशक्तिबलेनच अपिशत्रुंवधस्याहंमावधीःशरणंगतं अभ्यपात्रस्थपात्रंनीचो
पिमहत्तमः योवाऽपियाचतेकारुण्यात्स्वशिरोपिचदेहितं कीर्त्यैप्रयत्नेनसदातत्पुण्यमर्जय सत्कीर्तिप्र
भवालक्ष्मीःसत्कीर्तिःपुण्यकारिणी सत्कीर्त्याराजतेलोकेश्चंद्रश्चंद्रिकयायथा राज्ञांचविदुषांचैवकीर्तिरेव
हिभूषणं कीर्त्याचजीवनंलोकेस्वर्गस्वनसंशयः गजाश्वहेमनिचयंरत्नंचैवनगोपमं अकीर्त्यापहतं
सर्वंतृणवन्मुंचसत्वरं मातुःकोपंपितुःकोपंगुरोःकोपंधनव्ययं ब्राह्मणानांसमस्तंत्वंमनयंचमहामते य
थाद्विजाःप्रसीदेयुस्तथातेषांहितंचर राजानंसंकटेमग्नमुद्धरेयुर्द्विजोत्तमाः आयुर्यशोबलंसौख्यंधनंपु

ब्र॰ खं॰ ण्यं प्रजोन्नतिं कर्मणा येन जायेत तत्सेव्यं भवतानघ सम्यग्विचार्य कार्याणि यत्नेन कुरु सर्वदा न कुर्यात्कस्यचि
द्बाधां परबाधां निवारय चौरं शत्रुं च दुष्टं च बाधेथाः शक्तिमत्तया अतंद्रो भव निद्रायां भाजने भव सत्वरः दा
क्षिण्ययुक्तमशठं वचनं वद सर्वदा अभीतो भव सर्वत्र विपत्स्वपि विपत्सु च भीतो भव ब्रह्मकुले पापेषु गुरुशास
ने ज्ञातिबंधुषु विप्रेषु मायो यां च तथैव च समभावेन वर्तेथास्तथा भोजनपंक्तिषु सतां हितोपदेशेषु तथा पु
ण्यकथासु च विद्यागोष्ठीषु धन्यासु कुरु मा भूः पराङ्मुखः श्रुत्वा पुण्यजनस्थाने प्रख्याते ब्रह्मसंकुले म
हादेवशिवमेवास्त व्यं भवता तात सदा कुलटा गणिका यत्र यत्र तिष्ठंति कामुकाः दुर्देशे नीचसंस्थाने कदा
चिदपि मा वस एकाग्रया श्रितो नित्यं शिवं त्रिभुवनेश्वरं सर्वान्देवानुपासीथाः स्तुहि नानपि मानय सदा शु
चिः सदा दक्षः सदा शांतः सदा स्थिरः सदा विजितषड्वर्गः सदेकांतो भवानघ विप्रान्वेदविदः शांतान्यतीं
श्च नियमोज्ज्वलान् पुण्यवृक्षान्पुण्यतीर्थान् नदीं पुण्यां समस्तरः धेनुं च वृषभं सरत्नं युवतीं च पतिव्रतां आ
ह

त्मनो गृहदेवांश्च सहसैव नमस्कुरु प्रातःकाले समये ब्राह्मे स्वांतो विमलाशयः नमस्कृत्वात्मगुरवे ध्यायेद्देव
मुमापतिं नारायणं च लक्ष्मीशं ब्रह्माणं च विनायकं स्कंदं कात्यायनीं देवीं महालक्ष्मीं सरस्वतीं इंद्रादिलोकपा
लांश्च पुण्यश्लोकान्वरर्षीनपि चिंतयित्वातु मार्तंडमुदयंतं प्रणमेत्सदा गंधपुष्पं च तांबूलमन्यत्सत्फलकारि
कं शिवाय दत्वा भुंक्ष्व स्वयं चापूर्वं प्रियं नवं यद्भुक्तं यत्कृतं जप्तं यद्धुतं यच्च पूजितं यच्च तप्तं तपः सत्यं तच्छिवा
य निवेदयेत् भुंजानः पर्यटन्नातिष्ठञ्छयानोपि भ्रमन्नपि पश्यञ्छृण्वन्वदन्नाद्यञ्शिवमेवानुचिंतय रुद्रा
क्षकंकणालसत्करदंडयुग्मभालांतरालधृतभस्मसितत्रिपुंड्रः पंचाक्षरं परिपठन्शिवमंत्रराजं ध्याय
न्सदा पशुपतेश्चरणारविंदं इति संक्षेपतो वत्स कथितो धर्मसंग्रहः अन्येषु च पुराणेषु विस्तरेण प्रकी
र्तितः अथापरं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रं जयप्रदं सर्वविपद्विमोक्षं वक्ष्यामि शैवं व्र
तं हितायते ७० इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे न्यायधर्मवर्णनं नामैकादशोऽध्यायः ॥ ऋषभ उवाच

ब्रं॰ खं॰
५२

नमस्कृत्य महादेवं सर्वव्यापिनमीश्वरं वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणां शुचौ देशे समासीनो यथा
वत्कल्पितासनः जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययं हृत्पुंडरीकांतरसंनिविष्टं स्वतेजसा व्याप्तनभोवका
शं अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशं ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंदनि
मग्नचेताः षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षां मां पातु देवोखिलदेवतात्मा संसारकूपे
पतितं गभीरे तन्नाम दिव्यं वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थं सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मया
नंदघनश्चिदात्मा अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् यो भूस्वरूपेण बिभर्ति वि
श्वं पायात्स भूमेर्गिरिशोष्टमूर्तिः योपां स्वरूपेण [illegible] नृणां करोति संजीवनं सोवतु मां जलेभ्यः क
ल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः स कालरुद्रोवतु मां दवाग्नेर्वात्यादिभीतेर
खिलाच्च तापात् प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः चतुर्मुखस्तत्पुरुषस्त्रिने ५२

त्रः प्राच्यां दिशो रक्षतु मामजस्रं कुठारखेटांकुशपाशशूलः खड्वांगभृद्राक्षगुणं दधानः चतुर्मुखो नीलरुचिस्त्रि
नेत्रः पायादघोरो दिशि दक्षिणस्यां कुंदेंदुशंखस्फटिकावभासो वेदाक्षमालावरदाभयांकः त्र्यक्षश्चतुर्व
क्त्र उरुप्रभावः सद्योधिजातोवतु मां प्रतीच्यां वराक्षमालाभयटंकहस्तः सरोजकिंजल्कसमानवर्णः त्रिलो
चनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः वेदाभयेष्टांकुशपाशटंककपालढक्काक्षगुणं दधानः सि
तद्युतिः पंचमुखोवतान्मामीशान ऊर्ध्वं परमप्रकाशः मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्यादथभा
लनेत्रः नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः पाया छ्रुती मे श्रुतिगीतकीर्तिः कपोलम
व्यात्सततं कपाली वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां हरो रक्षतु वेदजिह्वः कंठं गिरीशोवतु नीलकंठः पाणि
द्वयं पातु पिनाकपाणिः दोर्मूलमव्यान्मम धर्मबाहुर्वक्षःस्थलं दक्षमखांतकोव्यात् ममोदरं पातु गिरींद्रधन्वा
मध्यं ममाव्यान्मदनांतकारी हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ऊरुद्वयं पातु कुबेरमि

× पायान्निशादौ शशिशेखरो मां ×२

स्कं· ब्र· खं· चो जंघायुगं पुंगवकेतुरव्यात् जानुद्वयं मे जगदीश्वरोऽव्यात् पादौ ममाव्यात्सुरवंद्यपादः महेश्वरः पातु दिनादियामे
मां मध्ययामे वतु वामदेवः त्रियंबकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे गंगाधरो रक्षतु मां निशी
थे गौरीपतिः पातु निशावसाने मृत्युंज× तृतीये ×यो रक्षतु सार्वकालं अंतःस्थितं रक्षतु शंकरो मां स्था
णुः सदा पातु बहिः स्थितं मां तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात् तिष्ठंतमव्याद्भुवनैक
नाथः पायाद्व्रजंतं भुवनादिनाथः वेदांतवेद्योऽवतु मां निषण्णं ममाव्ययः पातु शिवः शयानं मार्गेषु मां र
क्षतु नीलकंठः शैलादिदुर्गेषु पुरत्रयारिः अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः कल्पांत
काटोपपटुःप्रकोपः स्फुटाट्टहासोच्चलितांडकोशः घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः प
त्यश्वमातंगरथवरूथसहस्रलक्षायुतकोटिभीषणं। अक्षौहिणीनां शतमाततायिनां छिंद्यान्मृडो घोरकुठा
रधारया निहंतु शत्रून्प्रलयानलार्चिर्ज्वलत्रिशूलं त्रिपुरांतकस्य शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रास

यत्वीशधनुः पिनाकः दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि उत्पाततापविषभी
तिरसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सक
लविदूराय सकललोकैककर्त्रे सकललोकैकभर्त्रे सकललोकैकहर्त्रे सकललोकैकगोप्त्रे सकललोकै
कपित्रे सकललोकैकमात्रे सकललोकैकनेत्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनि
गमगुह्याय सकलवरप्रदाय सकलदुरितभंजनाय सकलजगदभयंकराय सकललोकैकशंकराय
शशांकशेखराय शाश्वतनिजाभासाय निर्गुणाय निरूपमायशिवाय नित्यशुद्धाद्वैतपरिपूर्णसच्चिदान
दाय परमशांतिप्रकाशतेजोरूपाय जय जय महारुद्र महारौद्र दुःद्रावण भद्रावतार महाभैरव कालभैरव
कपालमालाधर खट्वांग चर्मपाशांकुश डमरु शूल चापबाण × ख × गदाशक्ति भिंडिमाला तोमर मुसल
मुद्गर पाश परिघ भुशुंडी शतघ्नी चक्रायुध भीषणकर सहस्रमुख दंष्ट्राकराल विकटाट्टहास वि

ब्रं· खं·

५४

विस्फारितब्रह्मांडमंडलनागेंद्रकुंडलनागेंद्रवलयनागेंद्रहारनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतक
विरूपाक्षविश्वेश्वरवृषभवाहनविभूतिभूषणविश्वतोरक्ष रक्षमां ज्वलज्वलमहामृत्युभयंनाशयनाश
यरोगभयंनाशयनुत्सादय२विषसर्पभयंशमय२चोरान्मारय२ममशत्रून्नुच्चाटय२त्रि
शूलेनविदारय२कुठारेणभिंधि२खड्गेनछिंधि२खट्वांगेनव्यपोथय२मुसलेननिष्पेषय२बाणैःसंताडय२
रक्षांसिभीषय२भूतानिविद्रावय२कूश्मांडवेतालमारीचीगणब्रह्मराक्षसान्संत्रासय२ममाभयंकु
रुकुरु वित्रस्तमामाश्वासय२ नरकमहाभयान्मुद्धरय२संजीवय२क्षुत्तृड्भ्यामाप्यायय२दुःखातुरमा
नंदय२शिवकवचेनममाछादय२त्र्यंबकेनमस्तेनमस्तेनमस्ते ७ ऋषभउवाच इत्येतत्कवचंशै ५४
वंवरदंव्याहृतंमया सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमं
नतस्यजायतेक्वापिभयंशंभोरनुग्रहात् क्षीणायुर्मृत्युमापन्नोमहारोगहतोपिवा सद्यःसुखमवाप्नो

तिदीर्घमायुश्चविंदति सर्वदारिद्र्यशमनंसौमांगल्यविवर्धनं योधत्तेकवचंशैवंदेवैरपिसपूज्यते महापातक
संघातैर्मुच्यतेचोपपातकैः देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः त्वमपिश्रद्धयावत्सशैवंकवचमुत्तमं धा
रयस्वमयादत्तंसद्यःश्रेयोह्यवाप्स्यसि सूतउवाच इत्युक्त्वाऋषभोयोगीतस्मैपार्थिवसूनवे ददौशंखं
महारावंखड्गंचारिनिषूदनं पुनश्चभस्मसंमंत्र्यतदंगंसर्वतोस्पृशत् गजानांषट्सहस्रस्यद्विगुणंचबलं
ददौ भस्मप्रसादात्संप्राप्तबलैश्वर्यधृतिःस्मृतिः सराजपुत्रःशुशुभेशरदर्कइवश्रिया तमाहप्रांजलिंपु
नःसयोगीराजनंदनं एषखड्गोमयादत्तस्तपोमंत्रप्रभावतः शितधारमिमंखड्गंयस्मैदर्शयसेस्फुटं ससद्यो
म्रियतेशत्रुःसाक्षान्मृत्युरपिस्वयं अस्यशंखस्यनिर्ह्रादंयेशृण्वंतितवाहिताः तेमूर्छिताःपतिष्यंतिन्यस्तश
स्त्राविचेतनाः खड्गशंखाविमौदिव्यौपरसैन्यविनाशनौ आत्मसैन्यस्वपक्षाणांशौर्यतेजोविवर्धनौ एतयो
श्चप्रभावेनशैवेनकवचेनच द्विषट्सहस्रनागानांबलेनमहतापिच भस्मधारणसामर्थ्याच्छत्रुसैन्यंविजेष्य

सिप्राप्यसिंहासनंपित्र्यंगोप्तासिपृथिवीमिमां इतिभद्रायुषंसम्यगनुशास्यसमाहितः ताभ्यांसपूजितःसोथयोगी
स्वैरगतिर्ययौ ६० ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिववर्मकथननामद्वादशोध्यायः ॥ सूतउवाच
दशार्णाधिपतिस्तस्य वज्रबाहोर्महाभुजः बभूवशत्रुर्बलवान्राजामगधराट् ततः सवैहेमरथोनामबहु
शालीमदोत्कटः बलेनमहतादशार्णान्रुणद्बली चमूपास्तस्यदुर्धर्षाः प्राप्यदशार्णकं व्यलुंपन्
सुरत्नानिगृहाणिददहुःपरे केचिद्धनानिजगृहुःकेचिद्बालस्त्रियोधनं आययुस्तस्यनगरीं वज्रबाहोस्तुमा
गधाः एवंपर्याकुलंवीक्ष्यराज्यंनगरमेवच युद्धायनिर्जगामाशुवज्रबाहुःससैनिकः वज्रबाहोस्तुभू
पालास्तथामंत्रिपुरःसराः युयुधुर्मागधैःसार्धंनिघ्नंतोरिपुवाहिनीं वज्रबाहुर्महेष्वासोदंशितोरथमा
स्थितः चिकिरन्बाणवर्षाणिचकारकदनंमहत् दशार्णराजयुध्यंतंदृष्ट्वायुद्धेषुदुःसहं तमेवतरसा
बभुःसर्वेमगधसैनिकाः हत्वातुसचिरंयुद्धंमागधोदृढविक्रमः तत्सैन्यंनाशयामासलेभिरेचजयश्रि

यं केचित्तस्यरथंजघ्नुःकेचित्तद्धनुराच्छिनत् सूतंतस्यजघानेकःपरःखड्गंसमाच्छिनत् सच्छिन्नखड्गधन्वा
नं विरथंहतसारथिं बलाद्गृहीत्वाबलिनोबबंधुर्नृपतिंरुषा तस्यमंत्रिगणंसर्वंतत्सैन्यंचनिहन्यते माग
धास्तस्यनगरींविविशुर्जीविकांक्षिणः अश्वान्गजांश्चरथानुद्धानंशुकानिधनानिच जगृहुर्युवतीःस
वाश्चावेगीरपिकन्यकाः एवंविनश्यनगरींभृत्यस्त्रीगोधनादिकं वज्रबाहुंबलाद्बध्वारथेस्थाप्यचि
निर्ययुः एवंकोलाहलेजातेराष्ट्रनाशेसुदारुणे राजपुत्रोथभद्रायुस्तद्वार्तामपिदुःसहां सशंखखड्ग
मादायवैश्यपुत्रसहायवान् × राज्ञोवरोधमहिषीदासीश्चैवसहस्रशः कोशंचरत्नसंपूर्णंजगृहुस्त्वागतोपिच ×
कुमारोहयमारुह्यदंशितोविजिगीषया जवेनागत्यतंदेशंमागधैरावृतंतदा राज्यमाक्रंदमानंचहृत
स्त्रीगोधनंगृहं दृष्ट्वाराष्ट्रजनंशून्यंसर्वंत्रैवभयावहं क्रोधमासनृपस्तूर्णंप्रविश्यरिपुवाहिनीं आ
कर्णाकृष्यकोदंडोववर्षशरसंततिं तेहन्यमानारिपवोराजपुत्रेणसायकैः तमभिद्रुत्यवेगेनशरौघैर्व्यधु

बृं उत्त
५९

शल्बयोः हन्यमानेस्तु वेगेनारिपुभिर्युद्धदुर्मदैः नव बालरणे धीरः शिववर्माभिरक्षितः सोऽस्त्रवर्षं प्रगृह्याशु प्रवि
श्य गजलीलया जघानाश्वान् रथान् नागान् पदातीन् नाति कोटयः तत्रैकं नृपतिं हत्वा स सत्वं नृपनंदनः तमेव रथमा
रुह्य प्रवेश्य नंदनसारथिः स चचार रणे धीरः सिंहो मृगकुले यथा अथ सर्वे सुसंरब्धाः शूराः प्राद्युम्नकानुगाः
अभिसस्रुस्तमेवैकं चमूपा बलशालिनः तेषामापततामग्रे खड्गमुद्यम्य दारुणं अभ्यायया महावीरो दर्शयन्
निजपौरुषं करालांतकजिह्वाभं तस्य खड्गं महोज्वलं दृष्ट्वैव सहसा मम्लुश्चमूपास्तत्र भावतः ये ये पश्यंति तं
खड्गं स्फुरंतं रणांगणे ते सर्वे निधनं जग्मुर्वह्निं प्राप्येव कीटकाः अथासौ सर्वसैन्यानां विनाशाय महाभुजः शंखं द
ध्मौ महारावं पूरयन्निव रोदसी तेन शंखनिनादेन विशुद्धेनैव भूयसा श्रुतमात्रेण रिपवो मूर्छिता पतिता भुवि श्रीः
यश्च पट्टस्थये चयेवरं तिष्ठ संस्थिताः ते विसंज्ञाः क्षणात्सेतुः शंखनादहतौजसः तानश्मोपनिनान्दवेल्लनस्त [?] ५९
संज्ञानिरायुधान् विगणय्य मृतप्रायान्नवधीद्धर्मशास्त्रवित् आनीनः पितरं बद्धं मोचयित्वा रणाजिरे तस्य

स्नीः शत्रुवशगाः सर्वाः सद्योऽमोचयत् पत्नीश्च मंत्रिमुख्यानां तथान्येषां पुरौकसां स्त्रियो बालाश्च वृद्धाश्च गोध
नानि अनेकशः मोचयित्वा रिपुभयात्क्षणमाश्वास्य पीडितान् मरुन्मनोजवानश्वान्मातंगान् गिरिसंनिभान् स्यं
दनानि च रौक्ममणि दासीश्च रुचिराननाः सर्वमाहृत्य वेगेन गृहीत्वा च धनं बहु मागधेशं हेमरथेनिबद्धं पराजि
तं तन्मंत्रिणस्तु चमूपास्तु तन्मुख्याश्च नायकाः गृहीत्वा तरसा बध्वा पुरं प्रावेशयद्द्रुतं युद्धे ये समरे भग्ना विद्रुता
सर्वतो दिशं ते मंत्रिमुख्या अश्वस्था नायकाश्च समाययुः कुमारविक्रमं दृष्ट्वा सर्वे ते च विचिंतसः ते मेनिरे स्व
श्रेष्ठं कारणादागतं भुवि अहो नः समहद्भाग्यमहो नः सुमहत्फलं केनाप्यनेन वीरेण मृताः संजीविताः पुनः
एष किं योगसिद्धो वा योगी वाप्यमरोऽथवा किं अमानुषमिदं कर्म यदनेन कृतं महत् जनमस्य भवेन्माता सा गौरी स शिवः पिता असौ
हि पीनानवकं जघानांतकरूपधृक् इत्याश्चर्ययुतैर्हृष्टैः प्रशंसद्भिः परस्परं पश्चात्स्वात्मजनेनासौ आत्मानं चाहतत्पवित् सान्वा
६ गत्य स्वकथनं विस्मयाह्लादविह्वलः मुंचंतमानं दज्जलं नैवैप्रथमविह्वलः स राजा निजपुत्रेण प्रणयादभिवंदितः आश्लिष्य
गाढतरं सावभाषत्तपनंदनं कस्त्वं देवो मनुष्यो वा गंधर्वो वा महामते का माता जनकः को वा कोऽसि शास्त्रवनामकिं कस्मान्नः शार

बं. खं.

भिर्बद्धान्स्तानिवहतो नरः कारुण्यादिह संप्राप्य सपत्नीकान मोचयत् कुतो लब्धमिमं शौर्यं धैर्यं तेजो बलं कान्तिः विजित्य
सिंहलोकांश्च सस्त्यान्स्तरमानुषान् अपि जन्मसहस्रेण नानृण्यं महामते कर्तुं नाहं समर्थोऽस्मि सहैभिर्नरैरिबांधवैः इ
सपुत्रारिमां पत्नीमिदं राज्यमिदं पुरं सर्वं विहाय सहितं त्वय्येव प्रेमबंधनं सर्वं कथय मे तात मत्प्राणपरिरक्षक एतन्मम र
पत्नीनां त्वदधीनं च जीवितं सूत उवाच इति पृष्टः स भद्रायुः स्वपित्रा समभाषत एष वैश्यसुतो नाम्ना सुनयो मत्सखा न
प अहमस्य गृहे रम्ये वसामि सहमातृकः भद्रायुर्नाम यद्वृत्तं पश्चाद्विज्ञानमापतत् पुत्र प्रविश्य भद्रे ते सदारः ससुहृज्जनः
त्यक्ताभयमरातिभ्यो विहरस्व यथा सुखं नैतान्मुंच रिपुस्तावद्यावदागमनं मम अथ गमि---शीघ्रमात्मनिवेशनं इत्यु
क्त्वा नृपमामंत्र्य भद्रायुर्नृपनंदनः आजगाम स्वभवनं मात्रे सर्वं न्यवेदयत् सापि हृष्टा स्वतनयं परिरभ्य कलोचना स च वै
श्यपतिः प्रेम्णा परिष्वज्याभ्यपूजयत् वज्रबाहुश्च राजेन्द्र प्रविष्टो निजमंदिरं स्त्रीपुत्रामात्यसहितः प्रहर्षमतुलं ययौ तस्यां
निशायां नृपुनः नैषधो योगिनीवरः चंद्रांगदं समागत्य सीमंतिन्याः पतिं नृपं भद्रायुषः समुत्पत्तिं तस्य कर्मातिमानुषं अवेद्य
रहसि प्रेम्णा त्वत्सुतां कीर्तिमालिनीं भद्रायुषे प्रयच्छेति बोधयित्वा च नैषधं सर्षभो निजगामाथ देशकालार्थतत्त्ववित् अथ

चंद्रांगदो राजा मुहूर्ते मंगलोचिते भद्रायुषं समाहूय प्रायच्छत् कीर्तिमालिनीं कृतोद्वाहः स राजेंद्रकुमारः सह भार्यया हिमासनस्थः
श्वश्रुसे रोहिण्या च निशाकरः वज्रबाहुं तत्पितरं समाहूय स नैषधः पुरं प्रवेश्य सामात्यः प्रत्युद्गम्याभ्यपूजयत् तत्रापश्य
त्कृतोद्वाहं भद्रायुषमरिंदमं पादयोः पतितं प्रेम्णा हर्षात्तं परिषस्वजे एष मे प्राणदो वीर मम शत्रुनिबर्हणः अथाप्यज्ञात
वंशाय मयानंतपराक्रमः एष ते नृप जामाता चंद्रांगद महाबल अस्य वंशमथोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः इत्युक्तः दशा
र्णराजेन प्रार्थितो निषधापतिः विविक्त उपसंगम्य प्रहसन्निदमब्रवीत् एष ते तनयो राजन् शैशवो रोगपीडितः त्वया
वने परित्यक्तः सह मात्रा रुजार्दितः परिभ्रमति सा नारी विपिने शिशुना सह दैवाद्वैश्यगृहं प्राप्य तेन वैश्येन रक्षिता अथासौ
बहुरोगार्तो मृतस्तव कुमारकः केनापि योगीराजेन मृतः संजीवितः पुनः ऋषभाख्यस्य तस्यैव प्रभावाच्छिवयोगिनः रू
पं तेजश्च सादृश्यं प्राप्तो मात्र कुमारको तेन दत्तेन शंखेन खड्गेनारिविघातिना जिगाय समरे शत्रून् शिववर्माभिरक्षितः
द्विषट्सहस्रनागानां बलमेको बिभर्त्यसौ सर्वविद्यासु निष्णातो मम जामातृतां गतः अतएनं समादाय मातरं चा
स्य सुव्रतां गच्छ स्वनगरीं राजन् प्राप्यासि श्रेयमुत्तमं इति चंद्रांगदः सर्वमाख्यायान्तर्गृहे स्थितां तस्याग्रपत्नीमाहूय दशाया

ब्रं.उ.खं. ॰मामभ्रषिना इत्यादिसर्वमाकर्ण्यहृष्टोवाच समहीपतिः श्रीउतोनितरांमोध्यात्कृतंकर्मजुगुप्सितं प्राप्तश्चपरमानंदंसो
५८ योदर्शनकौतुकात् पुलकांकितसर्वांगस्त्वाबुभोपरिषस्वजे एवंनिषधराजेनपूजितश्चाभिनंदितः संभोजयित्वा
सम्यकृतंस्वयंचसहमंत्रिभिः तांजायांचतथापुत्रंस्नुषांचैवयथाक्रमं आदायपरिपरिवारेणवज्रबाहुःपुरींययौ
ससंभ्रमेणमहताभद्रायुःपितृमंदिरं संप्राप्यपरमानंदंससचक्रारपुरौकसां कालेनदिवमारूढे पितरिप्राप्तयौवनः
भद्रायुःपृथिवींसर्वांशशासाद्भुतशासनः मागधेशांहेमरथंमोचयामासबंधनात् संधायमैत्रींपरमांवसन्नैषधे
णाचसन्निधौ इत्थंविचित्रकौतुकमहतींशिवयोगिपूजांकृत्वापुरातनभवेपिसराजसूनुः निस्तीर्यदुःसहविपत्तिमा
मराज्यंचंद्रांगदस्यसुतयासहसाधुरेमे ६० ॰ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेभद्रायुपाख्यानंनाम त्रयोद
शोध्यायः श्री सूतउवाच प्राप्तसिंहासनेवीरोभद्रायुःसमहीपतिः प्रविवेशवनंरम्यंकदाचित्प्रिययासह ते ५८
स्मिन्विकसिताशोकप्रसूननवपल्लवे प्रोत्फुल्लमल्लिकाखंडकूजन्मत्तभ्रमरसंकुले नवकेसरसौरभ्यबहुराशि
जनात्मके सद्यःकोरकिताशोकतमालगहनांतरे प्रसूनैःप्रकारातिनम्रासाधवीवनमंडपे प्रवालकुसुमद्योत

चूतशाखाभिरंजिते पुन्नागवनविभ्राजत्पुंस्कोकिलविस्वरागिणी वसंतसमयेरम्येविजहारप्रियासह अथाविदूरे
स्कं क्रंदंतौधावितौद्विजदंपती अन्वीयमाणौव्याघ्रेणनृपसत्तमः पाहिपाहिमहाराजन्महाथनोकरुणानिधे एषआयो
तिशार्दूलोदंष्ट्रामावांमहारवः एषपर्वतसंकाशोनेकप्राणिभयंकरः यावन्नस्यादतिप्राप्यतावन्नौरक्षभूपते इत्थं
माक्रंदतंश्रुत्वासराजाधनुराददे तावदेत्यसशार्दूलोमध्येजग्राहतांवधूं हानाथनाथहाकांतहाशंभोहाजगद्गु
रो इतिरोरूयमाणांतांव्याघ्रोजग्राहभीषणः तावत्सराजानिशितैर्भल्लैर्व्याघ्रमताडयत् सशार्दूलोमहासत्वोराज्ञो
स्त्ररक्षतव्यथः बलाद्गृह्णीतांनारीमपातक्रूरसत्वरः व्याघ्रेणापहृतांपत्नींवीक्ष्यविप्रोथदुःखितः रुरोदसहप्रियेबाले
हाकांतेहापतिव्रते मामेकमिहसंत्यज्यकथंलोकांतरंगता त्वांप्रियांयोषितांत्यक्त्वाकथंजीवितुमुत्सहे राजन्हतेम
हास्त्राणिकृतेनश्लाघ्यमहद्धनुः कृतेनदशसाहस्रमहानागातिगंबलं किंतत्खड्गेनशंखेनकिंतेमस्त्राशविघ्नया।
किंसत्वेनप्रतापेनकिंप्रभावेनभूयसा तत्सर्वंविफलंजातंयच्चान्यत्त्वयितिष्ठति यस्तुवनौकसंजंतुंननिवारयतुक्ष
मः क्षत्रस्यायंपरोधर्मःसत्त्वाधपरिरक्षणं तस्मिन्कुलोचितेधर्मेनष्टेत्वंपरिजीवितेनकिं आर्त्तानांशरणार्थीनांत्राणं
कुर्वंतिपार्थिवाः प्राणैरप्यर्थधर्मज्ञास्तेद्विहीनामृतोपमाः आर्त्तत्राणविहीनानांरूपाणांमरक्षणात् इत्थंविलपितंत

ब्र. खं. स्यस्ववीर्यस्य विगर्हणं निशम्य नृपतिः सोथ आत्मन्येव विचिंतयन् अहो मे पौरुषं नष्टं मम दैवविपर्ययात् अद्य कीर्त्ति
श्च नष्टा मे पातकं प्राप्तमुत्कटं धर्मो मे प्युषितो नष्टो मंदभाग्यस्य दुर्मतेः नूनं मे संपदो राज्यं मायुष्यं क्षयमेष्यति आ
युश्च संपदो भोगाः पुत्रदाराधनानि च दैवेन क्षणमुत्पन्नं क्षणादस्तं व्रजंति च अतः पत्नीं द्विजन्मानं हृतदारं शक्यायुतं गत
शोकं करिष्यामि दत्त्वा प्राणानतिप्रियान् इति निश्चित्य मनसा भद्रायुर्नृपसत्तमः पतित्वा पादयोस्तस्य बभाषे परिसां
त्वयन् कृपां कुरु मम ब्रह्मन्नव शत्रुवधं हतो जनसि त्यज त्वं शोकं महाहो वा दास्याम्यर्थं तवेप्सितं इदं राज्यमिदं राज्ञी मम
चेदं कलेवरं त्वदधीनमिदं सर्वं किं ते भिलषितं वद ब्राह्मण उवाच किमादर्शोऽबुधांधस्य किं गृहे भैक्ष्यजीविनः किं
पुस्तकेन मूर्खस्य नस्त्रिकस्य धनेन किं आतोह -- पत्नीं कां भुक्तभोगान् कर्हिचित् इमां तवाग्रमहिषीं कामयेदी
यतां मम राजोवाच ब्रह्मन् किमेष धर्मस्ते किमेतद्गुरुशासनं आश्चर्यमस्याः परदाराभिमर्षणं दातारः सेति रत्नयाप्रे
वितस्य राज्यस्य गजवाजिनं आत्मदेहस्य वाप्यहो पि कलत्रस्य न कर्हिचित् परदाराभिभोगेन यत्पापं समुपा को २
र्जितं न तत्क्षालयितुं शक्यं प्रायश्चित्तसहस्रकैः ब्राह्मणोवाच अपि ब्रह्मवधं घोरमपि स्वर्णनिषेवणं तपसा
तारयिष्यामि किं पुनः पारदारकं तस्मात्त्वयच्छ भार्यां इमामद्य न चान्यथा अरक्षणाद्धृयात्तो नागतासि नरकं ध्रुवं ।

इति विप्रगिरा भीतश्चिंतयामास पार्थिवः अरक्षणात्महत्पापं पत्नीदानं ततो वरं पत्नीं द्विजायाय दत्त्वा किल्बिषमुक्तये सद्यो
वह्निं प्रवेक्ष्यामि कीर्त्तिश्चागर्हिता भवेत् इति निश्चित्य मनसा सतु ज्वाल्य हुताशनं तं ब्राह्मणं समाहूय तस्मै पत्नीं सहोदकं स्वयं स्ना
त्वा शुचिर्भूत्वा प्रणम्य विबुधेश्वरान् तमग्निं त्रिः परिक्रम्य ध्यात्वा स्वं महेश्वरं तमथाग्नौ पतिष्यामि प्रापदासक्तचेतसः प्रतिषेधा
यविश्वेशः प्रादुर्भूतो जगत्पतिः तमीश्वरं पंचमुखं त्रिनेत्रं पिनाकिनं चंद्रकलावतंसं प्रलंबितापिंगजटाकलापं मध्यंगतं भास्क
रकोटितेजसं मृणालगौरांगजे मिवाससं गंगातरंगोक्षितमौलिदेशं नागेंद्रहारावलिकंकणोर्मिकाकिरीटकासंगदकंक
णोज्वलं त्रिशूलासिखट्वांगकुठारचर्ममृगाभयेष्टाङ्कपिनाकहस्तं वृषोपरिस्थं सितनीलकंठं प्रादुर्भूतमग्ने नृपतिर्ददर्श अथां
बराद्भुतं पेतुर्दिव्याः कुसुमवृष्टयः प्रणेदुर्दुंदुभयो व्योम्नि गंधर्वा ननृतुर्जगुः तत्राजग्मुर्नारदाद्याः सनकाद्याः सप्तर्षयः
इंद्राद्यश्च लोकेशास्तथा ब्रह्मर्षयोमलाः तेषां मध्ये समासीनो महादेवः सहोमया ववर्ष करुणाभारसक्तिनम्रे मही
पतौ तद्दर्शनानंदितिजंभितांशः भयप्रवृद्धपाष्णांबुपरिप्लुतांगः प्रहृष्टरोमा विकिग्रस्वरं तुष्टाव गीर्भिर्मुकुलीकृतांजलिः रा कु
जोवाच नतोस्मि देहं वमनादिमव्ययं प्रधानमव्यक्तगुणं महांतं अकारणं कारणकारणं परं शिवं चिदानंदघनप्रस

६० शं त्वंविश्वसाक्षीजगतोस्यकर्त्तानिगूढधामाहृदिसन्निविष्टः अतोविचिन्वंतिधियाविपश्चितोयोगेरनेकैः यमीरूतभीतरो
धैः एकात्मनीभावयितुंत्वनेकोनानाधियायस्त्वनेकरूपः अतींद्रियंशक्तिरयास्त्वविचित्रंममनोयथासंधियतेहितेयदं
त्वंत्वांदुरापंमनसाधियश्चव्यपेतरूपंपरमा × मम × रूपं गुणैकनिःसंप्रकृतौविलीनंकथंपुनस्तोतुमकंगिरामे तथा
पिभव्यानमृतामुपयुपस्त्वंबांघ्रिपद्मंशरणंनितंजनं सघोरसंसारदवाग्निपीडितोभजामिनित्यंभवभीतिशांतये स
र्वक्षेत्रनिवासायक्षेत्रभिन्नात्ममूर्त्तये आसत्वायनमस्तुभ्यंसत्वाभासायभूयसे निराभासायनित्यायसत्यज्ञाननिरा
त्मने विशुद्धायनिर्द्वंद्वायविमाशेषवर्म्मिणे नमोनंतायमहतेशांतायशिवरूपिणे अघोरायसुघोरायघोराघोरविघि
दारणे भर्गायभवबीजानां × ला × भर्जनायगरीयसे नमोविधूतमायायचिदात्मगुणाय्यते त्राहिमांजगतांनाथपा
हिशंकरभाश्वत पाहिरुद्रविरूपाक्षपाहिमृत्युंजयाव्यय शंभोशशांकसतशेखरशांतमूर्त्तेगौरीपतेउपनिवेशाद्भुताशि ६०
नेत्रः गंगाधरोगजविदारणपुण्यकीर्तेश्रृतेशाघ्रधरनिवाससदानमस्ते सूतउवाच एवंस्तुवंतंराजानंदेवदेवोमहे
श्वरः प्रसन्नसहपार्वत्याप्रत्युवाचदयानिधिः श्रीसदाशिवउवाच राजन्तेपरितुष्टोस्मिभक्त्यापुण्यस्तवेनच

६१ अन्येनचेतासत्वंनित्यंसदामांपरिपूजय तवस्त्वावपरिक्षार्थंहिद्विजोभूत्वाहमागतः व्याघ्रेणयापरिग्रस्तासाक्षाद्देवीगिरींद्रया
व्याघ्रोमायामयोयस्तेशरेरक्षतविग्रहः धीरतांद्रष्टुकामस्तेपत्नीयाचितवानहं अस्याश्चकीर्तिमालिन्यास्तवभक्त्या
चमानद तुष्टोहंसंपरित्रयैममप्रत्यक्षतांगतः वैश्यपद्माकरोनामतत्पुत्रःसूनंमुखीधिपः राजोवाच सर्वेनेतान्महाद
वसदातंवार्श्वगातकुरु सूतउवाच अथराज्ञामहाभागाप्रणताकीर्तिमालिनी भक्त्याप्रसाद्यगिरिशंययाचेवर
मुत्तमं राज्ञोवाच चंद्रांगदोममपितामातासिमंतिनीचमे तयोर्याचेमहादेवत्वत्पार्श्वेसन्निधिंसदा एवमस्त्वितिगौरीशः
प्रसन्नोभक्तवत्सलः तयोःकामवरंदत्वाक्षणानंतर्हितोभवत् सापिराजामरेःपार्थिवपदंप्राप्यचश्रीलिनः सहितःकी
र्त्तिमालिन्याबुभुजेविषयान्प्रियान् दत्वावर्षायुतंराज्यमव्याहतबलोन्नतिः राज्यंपुत्रेषुविन्यस्यभजेकंभोप्रियं
कपरं चंद्रांगदोपिराजेंद्रोराज्ञीसमंतिनीचसा भक्त्यासंपूज्यगिरिशंजग्मतुःशांभवंपरं एतत्पवित्रमघनाशकर
विचित्रंशांभोगुणानुकथनंपरमंरहस्यं यःश्रावयेद्बुधजनान्प्रियतःपठेद्वासंप्राप्तभोगविभवःशिवमेतिसोंते ८०
इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिवभक्तमाहात्म्यकथनंनामचतुर्दशोध्यायः श्री सूतउवाच ऋषभस्यानु

भावोयंवर्णितःशिवयोगिनः अथान्यस्यापिवक्ष्यामिप्रभावंशिवयोगिनः भस्मनश्चापिमहात्म्यंवर्णयामिसमासतः श्रुत
त्वाभविष्यतियच्छ्रुत्वापापिनोपिहि अस्त्येकोवामदेवाख्यःशिवयोगीमहातपाः निर्द्वंद्वोनिर्ममःशांतोनिःस
गःसमदर्शनः आत्मारामोजितक्रोधोगृहदारविवर्जितः अतर्कितगतिर्मौनीसंतुष्टोनिःपरिग्रहः भस्मोद्धूलि
तसर्वांगोजटामंडलमंडितः वल्कलाजिनसंवीतोभिक्षापात्रपरिग्रहः सएकदाचरन्लोकेसर्वानुग्रहतत्परः क्रौं
चारण्यंमहाघोरंप्रविवेशयदृच्छया तस्मिन्निर्मनुजेरण्येतिष्ठत्येकोतिभीषणः क्षुधातृषाकुलितोनित्यंयःकश्चिद्ब्रह्म
राक्षसः अभिदुद्राववेगेनजग्धुंक्षुत्परिपीडितः व्यात्ताननंमहाकायंघोरदंष्ट्रंभयानकं तमायांतमभिप्रेक्ष्ययोगी
शोनचचालसः अथाभिद्रुत्यसहसासघोरोवनगोचरः दोर्भ्यांनिष्पीड्यजग्राहभिःशंकंशिवयोगिनं तदंगस्प
र्शनादेवसद्योनिर्धूतकिल्बिषः सब्रह्मराक्षसोघोरोविषमाश्चयदांस्मृतिमाययौ यथाचिंतामणिंदृष्ट्वालोहकांत्र
नातांव्रजेत् यथाजांबूनदींप्राप्यमृत्तिकास्वर्णतांव्रजेत् यथामानसमाश्रित्यवायसोयातिहंसतां यथामृतंनरो

पीत्वासद्योदेवत्वमाप्नुयात् तथैवहिमहात्मनोदर्शनस्पर्शनादिभिः सद्यःशुद्धिंसमायातः पूर्णानंदोबभूवह तद्गात्रल
ग्नसितभस्मकणानुविद्धोसघोविधूतघनपापतमस्वभावः संप्राप्यपूर्वभवसंस्मृतिरुग्रकायस्तत्पादपद्मयुगले
पतितोबभाषे प्रसीदमेमहायोगिन्प्रसीदकरुणाकर प्रसीदभवतप्तानांआनंदामृतवारिधे क्वाहंपापमहाघोरःस
र्वलोकभयंकरः क्वानेनमहानुभावस्यदर्शनंकरुणात्मनः उद्धरोद्धरमांघोरेपतितंदुःखसागरे तवसन्निधिमात्रे
णानंदोभिवर्द्धते वामदेवउवाच कस्त्वंवनचरोघोरोराक्षसोत्रकिमास्थितः कथमेतांमहाघोरांकष्टांगतिमवा
प्तवान् ब्रह्मराक्षसउवाच पार्थिवोहमितःपूर्वंपंचविंशतिमेयुगे गोप्तायवनराष्ट्रस्यदुर्जयोनामवीर्यवान् सो
हंदुरात्मापापीयान्स्वैरचारीमदोत्कटः दंडधारीदुराचारः प्रजाघ्नोनिर्घृणःखलः ब्रह्मन्युवाकलत्राणिकामसक्तो
जितेंद्रियः इमांपापीयसींचेष्टांपुनरेकांगतोस्म्यहं प्रत्यहंनूतनामन्यांनारींभोक्तुंमनःसदा आहृताःसर्वदेशेभ्यो
नार्योमद्भृत्यैर्मदाज्ञया भुक्त्वाभुक्त्वापरित्यजन्कामकंदिनेदिने अंतर्गृहेसुसंस्थाप्यपुनरन्याःसमाहिताः एवं
स्वराष्ट्रपरराष्ट्रस्थदेशांतरग्रामपुरव्रजेभ्यः आहृत्यनार्योरमितादिनेदिनेभुक्त्वापुनःक्वापिनभुज्यतेमया तथा

बृ. स्व. न्येचान्नभुंजंतेमयाभुक्ताश्चयाःस्त्रियः अंतर्गृहेषु निहिताः शोचंतेयद्दिवानिशं ब्रह्मविट्क्षत्रियस्त्रीणांयद्दाना
र्योहृतामया आहृत्याहृत्यरमितामयाकामहृतात्मना त्रिशतंद्विजनारीणांराजस्त्रीणांचतुःशतं षट्श
५२ × ममराज्यस्थिताविप्राः सहसारेभ्यद्रवत सभर्तृकाश्चकन्याश्चविधवाश्चरजस्वलाः ×× तंवैश्यनारी
णांशूद्रस्त्रीणांचतुःशतं सहस्रकं शतंचांडालनारीणांपुलिंदानांसहस्रकं शैलूषाणांपंचशतंरजकीनांचतुः
शतं असंख्याचारमुख्यानांमयाभुक्ताद्धुरात्मना तथापिममकामस्यनतृप्तिःसमजायत एवंदुर्विषयासक्ते
मत्तेपानरतेसदा यौवनेपिमहारोगाविविधाःयक्ष्मकास्यः रोगार्दितोनपत्यश्चशत्रुभिःपरिपीडितः त्यक्तोमा
त्येश्चभृत्येश्चमृतोहंस्वेनकर्मणा आयुर्विनश्यत्ययशोविवर्धते भाग्यक्षयंयात्यभियातिदुर्गतिं स्वर्गाच्च्यवंते
पितरःपुरातनाःधर्मव्ययेतस्यनिरस्यनिश्चितं यथाहंपुरुषैर्याम्यैर्नीतोवैवस्वतक्षयं कुंडेनतेननरकेरतेः ५२
कुंडेनिपातितः तत्राहंनरकेघोरेवर्षाणामयुतत्रयं रेतःपिंडेपीड्यमानोन्ययस्तन्त्यमकिंकरैः ततःपापावशे
षेणपिशाचोनिर्जनेवने सहस्रशीर्षासंजातोनित्यंक्षुत्तृट्समाकुलः पैशाचींगतिमाश्रित्यनीतोदिव्यंशर

कं द्वितीयेंशुभवेजातोरक्षःप्राणिभयंकरः तृतीयेजन्मनिघोरेचतुर्थेहंभवेद्वृकः पंचमेविड्वराहश्चषष्ठेहंसृकलो
लस्तः सप्तमेसारमेयश्चसृगालश्चाष्टमेभवे नवमेगवयोभूयोदशमेहंमृगोभवेत् एकादशेमर्कटश्चग
ध्रोहंद्वादशेभवेत् त्रयोदशेहंनकुलोवायसश्चचतुर्दशे अच्छभल्लःपंचदशेषोडशेवनकुक्कुटः गर्द
भोहंसप्तदशेमार्जारोष्टादशेभवत् एकोनविंशेमंडूकः कूर्मोविंशतिमेभवेत् एकविंशेभवेन्मत्स्योद्वाविंशे
मुखकस्तथा उलूकोहंत्रयोविंशेचतुर्विंशेवनद्विपः पंचविंशेभवेच्चास्मिन्जातोहंब्रह्मराक्षसः क्षुत्परीतो
निराहारोवसाम्यत्रमहावने इदानीमागतंदृष्ट्वाभवंतंजग्धुमुद्यतः त्वद्देहस्पर्शमात्रेणप्राप्तोपूर्वभवस्मृ
तिः गतजन्मसहस्राणिस्मराम्यद्यतवांतिके निर्वेदश्चपरोजातोप्रसन्नंहृदयंमम ईदृशोयंप्रभावस्तेकथं
लब्धोमहामते तपसाब्रह्मचर्येणकिंनुतीर्थनिषेवणात् योगैश्वर्यशक्त्यावामैत्रैवानेतेशक्तिभिः ततोमेब्रू
हिभगवन्त्वामहंशरणंगतः वामदेवोवाच एषमंत्रस्ल ×न× गतस्यभस्मप्रभावोभस्मनोमहान् यत्संपर्का
त्वमोनष्टंतवयंगतिरुत्तमा किंचेदंभस्ममाहात्म्यंमहादेवादृतःपरः दुर्विभाव्यंयथाशंभोर्माहात्म्यंभस्मनस्तथा

ब्रं.ख. पुराभवादृशः कश्चिद्ब्राह्मणो धर्मवर्जितः द्राविडेषु स्थितो मूढः कर्मणा शूद्रतां गतः चौर्यवृत्तिमिच्छति कोऽपि वृषलीरति
कालसः कदाचिच्चौरतां प्राप्य भद्रेण निहतो निशि तच्छवस्य बहिर्ग्रामात्क्षिप्तस्यापतकर्मणः चचार सारमेयां गभ
स्मपादाय दृष्ट्वा अतस्तं नरके घोरे पतितं शिवकिंकरैः निन्युर्विमानमारोप्य प्रसह्य यमकिंकरान् शिवदूता
स्तमभेत्य यमोऽथ परिपृष्टवान् महापातककर्तारं कथमेनं जिगीषथ अथोचुः शिवदूतास्ते पश्यास्ते शिवविग्रहे
ललाटवक्षोदोर्मूलान्यंकितानि सुभस्मना अत एनं समानेतुमागताः शिवशासनात् नास्मिन्निरोधं शक्तोसि मा
स्म कृत तव संशयः इत्याभाष्य यमं शंभोर्दूतास्ते ब्राह्मणं ततः पश्यतां सर्वलोकानां निन्युर्लोकमनामयं वाम
देव उवाच तस्मादशेषपापानां सद्यः संशोधनं परं शंभोर्विभूषणं भस्म सततं धार्यते मया राक्षस उवाच सा
धु साधु महायोगिन् धन्योऽस्मि तव शासनात् मां विमोचय पुण्यात्मन् घोरादस्मात्कुजन्मनः किंचिदस्तीति मे भाति मम
मपुण्यं पुरातनं अतो हे त्वत्प्रसादेन मुक्तः स्यां भवबंधनात् एकदा द्विजमुख्याय तस्मै पार्थिव जन्मनि भूमिर
त्निकरी दत्ता सस्यदामवती मया येन नापि तदेवोक्तं पंचविंशतिमे भवे कस्यचिच्चिद्योगिनः संगान्मोक्षसे संसृतेरिति तस्य
फलितं पुण्यमद्यापि किंचित्तावत्कुलवर्जितं अतो मा निर्जनेऽरण्ये संप्राप्तस्तव संगमः अतो मां घोरपापानं संततं तु कुजन्म
निः समुद्धर महासिंधो दत्त्वा भस्म समंत्रकं कथं धार्यमिदं भस्म को मंत्रः को विधिः स्मृतः कः कालः कश्च तन्मंत्रः सर्वं
कथय मे गुरो भवादृशा महात्मानः सर्वलोकहिते रताः आत्मनो हितमिच्छंति कल्पवृक्ष सधर्मिणः इत्युक्तस्तेन योगे
श्रो घोरेण वनचारिणा भूयोऽपि भस्ममाहात्म्यं वर्णयामास तत्त्वतः ७० इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे भस्म
माहात्म्यवर्णनं नाम पंचदशोऽध्यायः श्रीः छ वामदेव उवाच पुरा मंदरशैलेंद्रे नानाधातुविचित्रिते नानासिद्धस
माकीर्णे नानाद्रुमलतान्विते कालाग्निरुद्रो भगवान् कदाचिद्विश्ववंदितः समासमासीद्विश्वेशः स्वेच्छया परमेश्वरः र
समंतात्समुपातिष्ठन् रुद्राणां शतकोटयः तेषां मध्ये समासीनो देवदेवस्त्रिलोचनः तत्रागच्छत्सुरश्रेष्ठः सहदेवैः पुरंद
रः तथाग्निर्वरुणो वायुस्तथा वैश्रवणश्च सः गंधर्वाश्चित्रसेनाद्याः किन्नराः समहोरगाः विद्याधराः किंपुरुषाः सिद्धाः
साध्याः सगुह्यकाः ब्रह्मर्षयो वसिष्ठाद्याः नारदाद्याः सुरर्षयः पितरश्च महात्मानो दक्षाद्याश्च प्रजेश्वराः उर्वश्याद्याश्च

ब्रं.लो.
५८

प्रारसश्चंडिकाद्याश्च मातरः अदित्या वसवो रुद्रा विश्वेदेवा महौजसः अभूतपतयोप्यन्ये लोकसंरक्षणोपराः महाका
लश्च नंदी च तथा शंकरपार्श्वगौ वीरभद्रो महातेजाः शंकुकर्णो महाबलः घंटाकर्णश्च भद्रो मणिभद्रोथ कोदरः कुं
डोदरश्च विकटो महाकुंभोदरो बली महोदरः कुंडधरो केतुश्च गिरिटिस्तथा भूतयोनास्तथान्ये च मायाकाया महो
जसः सहस्रवर्णाश्च सहश्वेताः केचिन्मंडूकसन्निभाः हरिताधूसरा धूम्राः कबूराः पीतलोहिताः विचित्रवर्णाश्चित्रां
गाश्चित्रनीलांबरोत्कराः नानायुधोद्यतकरा नानावाहनभूषणाः केचिद्व्याघ्रमुखाः केचित्सूकरास्याः मृगाननाः
केचिद्बकवक्त्रवदनाः सारमेयमुखाः परे शृगालवदनाश्चान्ये उष्ट्राश्चवदनाः परे केचिच्छरभउग्रसिंहगृध्रोरगाननाः य
कहस्ताद्विहस्ताश्च पंचहस्ताः स्त्यहस्तकाः अपारा बहुपादाश्च बहुवर्णैकवर्णकाः एकनेत्राश्चतुर्नेत्रा दीर्घाः केचिच्च वाम
नाः एकवक्त्राश्चतुर्वक्त्रा बहुवक्त्राश्चतुर्मुखाः समंतात्परिवार्येशं भूतनाथमुपासते अथागच्छन्महातेजा मुनीनां श्री:
प्रवरः सुधीः सनत्कुमारो धर्मात्मा तं द्रष्टुं जगदीश्वरं सर्वदेवविभेशं सूर्यकोटिसमप्रभं महाप्रलयसंक्षुब्धं सप्तापि ५८
वघनः स्वयं संवर्ताग्निसमाटोपजटापटलशोभितं अक्षीणभालनयनज्वालाम्लाननिजत्विषा प्रदीप्तचंद्रामत्यानाशोभि

खंडेनमंडितं तक्षकं वामकर्णे च दक्षिणे न च वासुकिं बिभ्राणं कुंडलयुगं रत्ननीलमहाहनुं नीलग्रीवं महाबाहुं ना
गहारविराजितं फणिराजपरिभ्राजत्कंकणांगदमुद्रिकं अनंतफणिसाहस्रमणिरंजितमेखलं व्याघ्रचर्मपरीधा
नं घंटादर्पणभूषितं कर्कोटकमहापद्मधृतराष्ट्रधनंजयैः कूजन्नूपुरसंघट्टपादपद्मविराजितं पाशतोमरख
ट्वांगटंकशूलगदाधरं २५ अप्रधृष्यमनिर्देश्यमाविस्याकारमीश्वरं रत्नसिंहासनारूढं प्रणनाम महामुनिः तं
नकिंशाबोधावलितोनरात्मा संस्तूयागीभिः भक्तिसंयताभिः कृतांजलिप्रश्रयनम्रकंधरः पप्रच्छ धर्मानखिला
शुभप्रदान् यान्यानपृच्छन्मुनिस्तांस्तान्धर्मानशेषतः प्रोवाच भगवान्रुद्रो भूयो मुनिरपृच्छत सनत्कुमार०
श्रुतास्ते भगवन्धर्मास्त्वन्मुखान्मुक्तिहेतवः येयुक्ताः पापमनुजास्तरंति च ससागरं अथपरं महाधर्मामत्याया
समहत्फलं इहिकारुण्यतोमस्यं सर्वामुक्तिकरंनृणां अथासन्बहुलाधर्माः शास्त्रदृष्टाः सहस्रशः सम्य
क्तं सेविताः कालासिद्धया स्यातिमानवाः अतो लोकहितं गुह्यं भुक्तिमुक्तिश्च साधनं धर्मं विज्ञातुमिच्छामि

ब्र॰तर॰

त्वत्तो हि परमेश्वर श्रीशंकर उ० सर्वेषामेव धर्माणामुत्तमं श्रुतिनोदितं रहस्यं सर्वजंतूनां त्रिपुंड्रस्य च धारणं सन
त्कुमार उवाच त्रिपुंड्रस्य विधिं ब्रूहि भगवन् जगतां पते तत्त्वतो ज्ञातुमिच्छामि त्वत्प्रसादान्महेश्वर कति स्थानानि किं
द्रव्यं का शक्तिः का च देवता किं प्रमाणं च कः कर्ता के मंत्रास्तस्य किं फलं एतत्सर्वमशेषेण त्रिपुंड्रस्य च लक्षणं श्री
मे जगतां नाथ लोकानां हितकाम्यया ३९ श्रीमहादेव उ० आग्नेयमुच्यते भस्म दग्धगोमयसंभवं तदेव द्रव्यमि
त्युक्तं त्रिपुंड्रस्य महामुने सद्यादिति ब्रह्ममयैर्मंत्रैश्च पंचभिः परिगृह्याग्निरित्याद्यैर्मंत्रैर्भस्माभिमंत्र
येत् मानस्तोक इति संघर्षेच्छिरो लिंपेत्त्रियंबकैः त्रियायुषादिभिर्मंत्रैर्ललाटं भुजद्वये स्कंदे चैव लेपयेद्भस्म
सजलं मंत्रभावितं तिस्रो रेखा भवंत्युल्या मध्येन प्रतिकोमतः ॐगुष्ठेन च मनाग्रेखा त्रिपुंड्रस्य च धीमते तिस्र श्री:
णामपि रेखाणां प्रत्येकं नव देवताः ४० अकारो गार्हपत्याग्निर्भूर्लोकश्च रजोगुणः ऋग्वेदश्च क्रियाशक्तिः प्रातःस
वनमेव च महादेवस्तु रेखायाः प्रथमायाश्च देवताः उकारो दक्षिणाग्निश्च नभस्तलं यजुस्तथा मध्यंदिनं तु सव

नमिच्छाशक्तिस्तथैव च महेश्वरस्तु रेखाया द्वितीयायाश्च देवताः मकार आहवनीयो च परमात्मा तमो दिवो ज्ञानशक्तिः
सामवेदस्तृतीयं सवनं तं शिवश्चेति तृतीयाया रेखायाश्च देवताः एतेन्नित्यं नमस्कृत्य त्रिपुंड्रं धारयेच्छुचिः ४१
महेश्वरीमिदं सर्वलोकेषु कीर्तितं मुक्तिकामैर्नरैः सत्यं पुनस्तेषां न संभवः त्रिपुंड्रं कुरुते यस्तु भस्मना विधिपूर्वं ब्र
स्न × श्रेन × चारी वनस्थो वा गृहस्थो वाथवा यतिः महापातकसंघातैर्मुच्यते चोपपातकैः तथान्यक्षत्रविट्शूद्र
स्त्रीगोहत्यादिपातकैः वीरहत्याश्वहत्याभ्यां मुच्यते नात्र संशयः अमंत्रेणापि यः कुर्यात् ज्ञात्वा च महिमान्नतं
त्रिपुंड्रं भालफलके मुच्यते सर्वपातकैः परद्रव्यापहरणं गृहदारादिकमेव च असत्यं वाक्यपैशुन्यं पारुष्यं वेदविक्र
यं कूटसाक्षं व्रतत्यागः कैतव्यं नीचसेवनं गोभूहिरण्यमहिषीतिलकंबलवाससां अन्नधान्यजलादीनां नी
चेभ्यश्च प्रतिग्रहं दासीवेश्या भुजंगीषु वृषलीषु नटीषु च रजस्वलासु कन्यासु विधवासु च मैथुनं मांसचर्मरसा
दीनां लवणस्य च विक्रयः एवमादीन्यसंख्यानि पापानि विविधानि च सद्य एव विनश्यंति त्रिपुंड्रस्य च धारणात् ।

स्कं॰ खं॰ शिवद्रव्यापहरणं शिवनिंदां च कुत्रचित् । निंदां च शिवभक्तानां प्रायश्चित्तैर्न शुध्यति रुद्राक्षा यस्य गात्रेषु ललाटे
६६ च त्रिपुंड्रकं स चंडालोपि वै संपूज्यः सर्ववर्णोत्तमोत्तमः यानि तीर्थानि लोकेस्मिन् गंगाद्याः सरितस्तथा स्नातो भ
वति सर्वत्र ललाटे यस्त्रिपुंड्रधृक् सप्तकोटिमहामंत्राः पंचाक्षरपुरःसराः तथान्ये कोटिशो मंत्राः शैवाः कैवल्य
हेतवः ते सर्वे तेन जप्ताः स्युर्यो बिभर्त्ति त्रिपुंड्रकं इह भुक्त्वाखिलान्भोगान्दीर्घायुर्व्याधिवर्जितः जीवितांते च मर
णं सुखेनैव प्रपद्यते अष्टैश्वर्यगुणोपेतं प्राप्य दिव्यं वपुः शिवं ६९ दिव्यं विमानमारुह्य दिव्यं त्रिदशसे
वितं विद्याधराणां सिद्धानां गंधर्वाणां महौजसां इंद्रादिलोकपालानां लोकेषु च यथाक्रमं भुक्त्वा भो
गान्सुविपुलान्प्रजेशानां पदेषु च ब्रह्मणः परमासाद्य तत्र कल्पशतं रमेत् विष्णुलोके च रमते यावद्ब्रह्मा श्री॰
शतात्ययः शिवलोकं ततः प्राप्य रमते कालमक्षयं शिवसायुज्यमाप्नोति स नाभूयो न जायते सर्वोपनि ६६
षदां सारं समालोक्य मुहुर्मुहुः इदमेव हि निर्णीतं परं श्रेयस्त्रिपुंड्रकं अतस्त्रिपुंड्रमाहात्म्यं समासात्कथितं

मया रहस्यं सर्वजंतूनां गोपनीयमिदं त्वया इत्युक्त्वा भगवान्रुद्रस्तत्रैवांतरधीयत सनत्कुमारोपि मुनिर्ब्रह्मलो
कं जगाम सः वामदेव उ॰ तथापि भस्मसंसर्गात्संजाता विमला मतिः तमपि श्रद्धया पुण्यं धारयस्व त्रिपुंड्रकं ॰
सूत उवा॰ इत्युक्त्वा वामदेवस्तु शिवयोगी महातपाः अभिमंत्र्य ददौ भस्म घोराय ब्रह्मराक्षसे ७० तेनासौ भा
लफलके नियच्छकृत्रिपुंड्रकं ब्रह्मराक्षसतां सद्यो जहौ तस्यानुभावतः स बभौ सूर्यसंकाशो तेजोमंडल
भास्करः दिव्यावयवरूपश्री दिव्यमाल्यांबरोज्ज्वलः भक्त्या प्रदक्षिणीकृत्य तं गुरुं शिवयोगिनं दिव्यं विमा
नमारुह्य पुण्यलोकाञ्जगाम सः वामदेवो महायोगि दत्त्वा तस्य परां गतिं चचार लोके गूढात्मा साक्षाच्छिव
शिवः स्वयं य एतद्भस्ममाहात्म्यं त्रिपुंड्रं शृणुयान्नरः श्रावयेद्वा पठेद्वापि स याति परमां गतिं कथयति
श्रीशिवकीर्त्तिं स्मरणेर्मुक्तिहेतुं प्रणमति शिवयोगी ध्येयमीशांघ्रियुग्मं रचयति सितभस्मोद्भासिभाले त्रिपुं
ड्रं न पुनरिह जनन्या गर्भवासं जघन्यं ७६ इति श्री स्कं॰ ब्रह्मोत्तरखंडे भस्ममाहात्म्यं नाम षोडशोध्यायः १६

ब्र·खं·

ऋषयऊचुः वेदवेदांगतत्वज्ञैर्मुनिभिर्ब्रह्मवादिभिः नृणां छलोपदेशानां सम्यक्सिद्धिर्हि जायते अथान्यगुरु
सामान्यैर्गुरुभिर्नीतिकोविदैः नृणां छलोपदेशानां सिद्धिर्भवति कीदृशी सूतः श्रद्धैव सर्वधर्माणां मा
तेवाहितकारिणी श्रद्धयैव नृणां सिद्धिर्जायते लोकयोर्द्वयोः श्रद्धया भजतः पुंसः शिलापि फलदायिनी
मूर्खोपि पूजितो भक्त्या गुरुर्भवति पूजितः श्रद्धया जपितो मंत्रो अबद्धोपि फलप्रदः श्रद्धया पूजिता देवा नी
चस्यापि फलप्रदाः अश्रद्धया कृता पूजा दानं यज्ञस्तपो व्रतं सर्वं निष्फलतां याति पुष्पं वंध्यतरोरिव सर्वत्रा
श्रद्धयाविष्टः श्रद्धाहीनोतिचंचलः परमार्थात्परिभ्रष्टः संसारान्न विमुच्यते मंत्रे तीर्थे द्विजे देवे दैवज्ञे भेष
जे गुरौ यादृशी भावना कुर्यात्सिद्धिर्भवति तादृशी अतो भावमिदं विश्वं पुण्यं पापं च भावतः तदुभे भावही
नस्य न भवेतां कथंचन अत्रेदं परमाश्चर्यं माहात्म्यमनुवर्ण्यते अश्रद्धा सर्वमर्त्यानां सर्वदुःखप्रदायिनी ॥
आसीत्पंचालराजस्य सिंहकेतुरिति श्रुतः पुत्रः सर्वगुणोपेतो शाक्रस्येव धनंजयः स एकदा कतिपयैर्भटै

र्युक्तो महाबलः जगाम मृगयाहेतोर्बहुसत्वार्जितं वनं तत्रैकस्य शबरः कश्चिन्मृगयां विचरन्वने ददर्श जीर्णं
स्फुटितं पतितं देवतालयं तत्रापश्यद्भिन्नपीठं पतितं खंडिकोपरि शिवलिंगमदंसूक्ष्मं स शबरो दैवचोदितः
स समादाय वेगेन पुण्यकर्मप्रचोदितः तस्मै संदर्शयामास राजपुत्राय धीमते पश्येदं रुचिरं लिंगं मया दृष्ट
मिह प्रभो एतत्त्वं पूजयिष्यामि यथाविभवमादरात् अस्य पूजाविधिं ब्रूहि यथा देवो महेश्वरः अमंत्रज्ञैः
परंचीनैः प्रीतो भवति पूजितः इति तेन निषादेन पृष्टः पार्थिवनंदनः प्रत्युवाच प्रहस्येनं परिहासविशारदः
संकल्पेन स सदा कुर्यादभिषेकं नवांभसा उपवेश्यासने शुद्धे गंधाक्षतैर्नवैः वन्यैः पत्रैश्च कुसुमैर्धूपै
र्दीपैश्च पूजयेत् चिताभस्मोपहारं तु प्रथमं परिकल्पयेत् नमस्कृत्वाथ विधिवत्प्रसादं धारयेत्ततः एष
साधारणः प्रोक्तः शिवपूजाविधिस्त्वयं चिताभस्मोपहारेण संतुष्यति शंकरः सूतः परिहासरसेन
संशासितः स्वामिनामुना सचांडालाख्यः शबरो मूर्ध्ना जग्राह तद्वचः ततः स्वभुवनं प्राप्य लिंग

श्रीः

ब्र॰खं॰९ भक्तिमान्महेश्वरं प्रत्यहं पूजयामास चिताभस्मोपहारतः यच्चात्मनः प्रियं वस्त्रगंधपुष्पाक्षतादिकं नैवेद्यं शंभवेनि
६८ द्यमुपभुक्तवतः स्वयं एवं महेश्वरं भक्त्या सह पत्न्याभ्यपूजयत् एवं नरसखमासाद्य निनाय कतिचित्समाः एक
दा शिवपूजायै प्रवृत्तः शबरोत्तमः नददर्श चिताभस्म पात्रे पूरितमण्वपि अथासौ त्वरितो दूरं गत्वा क्वापि परिभ्रमन्
नलब्धवांश्चिताभस्म किं करोमि वद प्रिये शिवपूजांतरायोयं जातो मे वद पापिनः पूजां विना क्षणमपि नाहं जीवि
तुमुत्सहे उपायं नात्र पश्यामि पूजोपकरणाहृते मद्गुरोश्च विहन्येत त्रासनं सकलं कार्यं इति व्याकुलितं दृष्ट्वा भर्ता
रं वरांगना प्रत्यभाषत मा भैस्त्वमुपायं प्रवदामि ते इदमेव गृहं दग्ध्वा बहुकाष्ठैकवंहितं अहमग्निं प्रवेक्ष्या
मि चिताभस्म भवेत्ततः शबरः । धर्मार्थकाममोक्षाणां देहः परमसाधनं । कथं त्यजसि तं देहं सख्याहं नवयौ श्रीः
वनं अधुनात्वनपत्यात्वमभुक्तविषयासवा भोगभोग्यमिदं देहं कथं त्यक्तुमिहेच्छसि शबर्यु॰ एतावदेवसा ६८
फल्यं जीवितस्य च जन्मनः परार्थे यस्त्यजेत्प्राणान् किं स्वार्थे किं पुनः प्रभो किं नु तप्तं तपो घोरं किं नु जप्तं मया पुरा

किं वार्चनं पुरा शंभोस्तव जन्मशतांतरे किं वा पुण्यं मम पितुः किं वा मातुः कृतार्थता यच्छिवार्थे समिद्धेग्नौ त्यजाम्यद्य
कलेवरं इत्युक्तमतिस्थिरां दृष्ट्वा तस्या भक्तिं च शंकरे तथेति दृढसंकल्पः शबरः प्रत्यपूजयत् सा भर्त्रा समनुज्ञाता
स्नात्वा सुचिरलंकृता गृहमुद्दीप्य तं वह्निं भक्त्या चक्रे प्रदक्षिणं नमस्कृत्वात्मगुरवे हृदि ध्यात्वा सदाशिवं अग्नि
प्रवेशाभिमुखी कृतांजलिरिदं जगौ शबर्यु॰ पुष्पाणि संतु मम देव षडिंद्रियाणि धूपोगरुर्वपुरिदं हृदयं प्रदीपः प्राणा
हवींषि करणानि नवाक्षतास्ते पूजाफलं व्रजतु सांप्रतमेष जीवः वांछामि नाहमपि सर्वधराधिपत्यं न स्वर्गमुत्तम
चलं न पदं विधातुः भूयो भवामि जगदीश न च प्रसादात् त्वत्पादपद्मविलसन्मकरंदभृंगी जन्मानि संतु मम देववराना
धिकानि मा यान्तु मे विशतु चित्तमबोधहेतुः किंचित्क्षणार्धमपि ते चरणारविंदात्प्राप्तुं महत्पदमीशान नमो नमस्ते इ ५३
ति प्रसाद्य देवेशं शबरी दृढनिश्चया विवेश ज्वलितं वह्निं भस्मसात्समभवत्क्षणात् शबरोपि च तद्भस्म यत्नेन परिगृ
ह्य सः चक्रे दग्धगृहोपांते शिवपूजां समाहितः अथ संस्मार पूजांते प्रसादग्रहणोत्सुकां दयितां नित्यमायां

ब्र॰ ७९ तां प्रांजलिं विनयान्वितां स्मृतमात्रां तदापश्यदागतां च ततः प्रियां पूर्ववद्वयवेषयुक्तां भक्तिनम्रां शुचिस्मितां तां
वीक्ष्य शबरः पत्नीं प्रांजलिपूर्वं वस्थितां भस्मावशेषं च गृहं यथापूर्वमवस्थितं किमयं स्वप्न आहोस्वित्किं
वामायाभ्रमात्मिका इति विस्मयसंभ्रांतस्तां वधूं पर्यपृच्छत अयि प्रिये कथं प्राप्ता भस्मीभूतासि पावके स्वयं
च भवनं भूयः कथं पूर्ववदास्थितं शबर्युवाच यदा गृहं समुद्दीप्य प्रविष्टास्मि हुताशनं तदात्मानं न जानामि न प
श्यामि च पावकं न तापक्लेशोप्यासीन्मे प्रविष्टायाश्च स्मृतिः सुप्तेव क्षणादूर्ध्वं प्रसुप्तास्मि पुनः क्षणात् ता
वनमद्राक्षं न दग्धमिव संस्थितं अधुना त्वत्पूजितप्रसादं लब्धुमागता एवं परस्परं तौ दंपत्योर्भाषमाण
योः प्रादुरासीत्तयोरग्रे विमानं सूर्यवर्चसं तस्मिन्विमाने शतवर्द्धभासुरे चत्वार ईशानुचराः पुरस्थिताः हस्ते
गृहीत्वाथ निषाददंपती आरोह्य तौ भासुरमुक्तविग्रहौ शिवलोकं समासाद्य परमानंदमापतुः तस्माद्देवदेवस शिव॰
र्वेषु विधेयाः सर्वकर्मसु नीचोपि शबरः प्राप श्रद्धया योगिनां गतिं किं जन्मना सत्कुलवर्णजन्मना तत्र मनी किं विद्यया
श्रुतिपुराणविचारदृष्ट्या यस्यास्ति चेतसि सदा परमेशभक्तिः कोन्यस्ततस्त्रिभुवने पुरुषोस्ति धन्यः ॥ छ ॥

इति श्रीस्कंद॰ ब्रह्मो॰ शबराख्यानं नाम सप्तदशोध्यायः ॥ छ ॥ सूतः अथाहं संप्रवक्ष्यामि सर्वधर्मोत्तमोत्त
मं उमामहेश्वरं नाम व्रतं सर्वार्थसिद्धिदं आनर्ते संभवः कश्चिन्नाम्ना देवरथो द्विजः कलपुत्रसंपन्नो विद्वानु
त्तमवंशजः तस्यैवं वर्त्तमानस्य ब्राह्मणस्य गृहाश्रमे बभूव शारदा नाम कन्या कमललोचना तो रूपलक्षणो
पेता बाला द्वादशहायना ययाचे पद्मनाभाख्यो मृतदारश्च स द्विजः महाधनस्य धातस्य सदाचारस्य तस्य
च याञ्चाभंगभयात्तस्य तां कन्यां प्रददौ पिता मध्यंदिने कृतोद्वाहः स विप्रः श्वशुरालये संध्यामुपासितुं सायं सर
स्तटमुपाययौ उपास्य संध्यं विधिवत्स्वस्यागतमो व्रते मार्गे दष्टो भुजंगेन ममार निजकर्मणा तस्मिन्मृते हृतो
द्वाहे सहसा तस्य बांधवाः चुकुशुः शोकसंतप्ताः श्वशुरावस्य कन्यका निवस्य ते बंधुजनं जग्मुः स्वं स्वं निवेशनं
शारदा प्राप्तवैधव्या पितुरेवालये स्थिता मृतत्वाद्दानभीष्टेन भर्त्रा विरहिता सती निनाय कतिचिन्मासान् सा बा
ला पितृमंदिरे कदाचिन्नैध्रुवो नाम कश्चिद्वृद्धतरो मुनिः अंधः शिष्यकरग्राही तन्मंदिरमुपाययौ तस्मिन्वृद्धे
गृहे प्राप्ते गतेषु क्वापि बंधुषु साक्षाद्दिवाकरं मनोर्वंशं सा बाला समुपाचरत् स्वागतेन महाभाग पीठेस्मिन्नुपविश्यतां ॥

व्रं॰अ॰९
७०
नमस्तेमुनिनाथायप्रियंतेकरवामकिं इत्युक्त्वाभक्तिमास्थायकृत्वापादावनेजनं वीजयित्वापरिश्रांतंतंमुनिंपर्यतो
षयत् श्रांतंपीठंसमावेश्यकृत्वाभ्यंगंस्वपाणिना कृतस्नानंचविधिवत्कृतदेवार्चनंमुनिं सुखासनेचोपवेश्यगंध
माल्यानुलेपनैः अर्चयित्वावरान्नेनभोजयामाससादरं भुक्त्वाचसम्यक्स्नानकेसुस्नातानंदनिर्भरः चकाराथमु
निश्चायस्तस्यैसुप्रीतःपरमाशिषं विहृत्यभर्त्रासहसावतेनलब्ध्वासुतंसर्वगुणोपेतंत्वं कीर्तिश्चलोकेमहती
मयापप्रसादयोग्याभवदेवतानां इत्यभिव्याहृतंतेनमुनिनागतचक्षुषा निशाम्यविस्मिताबालाप्रखुवाचहंतं
२ जलिः ब्रह्मन्यत्त्वयोक्तंतत्सत्यंकोनिन्नमृषाभवेत् तदेतन्मेदुर्भाग्यायाःकथमेतद्भविष्यति शिरसायामिव
सद्दृष्टिःशुभवर्योक्तसत्कथा विफलामेदुर्भाग्यायामाशीब्रह्मविदामपि सेयाहंविधवाब्रह्मन्दुःखमेफलभो
गिनी तवाशीर्वचनस्यास्यकथंयास्यामितत्फलं मुनिः॰ तामनाकृष्ययत्प्रोक्तमेयेनापिमयाधुना तदेवसाध शिव॰
यिष्यामिकुरुशोभेसुनंशुभं उमामहेश्वरंनामव्रतंयश्चरिष्यसि तेनव्रतानुभावेनसधःश्रेयोभिभोक्ष्यसे ७०
शारदे॰ ततोपदिष्टंयत्नेनचरिष्याम्यपितुश्वरं तदुक्तंब्रूहिमेब्रह्मन्विधानमपिकीदृशं मुनिः चैत्रेवामार्ग

शीर्षेवाशुक्लपक्षेशुभेदिने व्रतारंभंप्रकुर्वीतयथावद्गुर्वनुज्ञया अष्टम्यांवचतुर्दश्यामुभयोरपिपक्षयोः संकल्पंविधिव
त्कृत्वाप्रातःस्नानंसमाचरेत् संतर्प्यपितृदेवादीनागत्यस्वभवनेप्रति मंडपंरचयेद्दिव्यंवितानाद्यैरलंकृतं फलपल्लव
पुष्पाद्यैस्तोरणैश्चसमन्वितं पंचवर्णैःकृतंतन्मध्येरजोभिःपद्ममुद्धरेत् चतुर्दशदलेबाह्येद्वाविंशाष्टदलंतरे तदंत
रेषोडशभिःरश्मिभिश्चांतरेंतरे एवंपद्मंसमुद्धृत्यपंचवर्णैर्मनोरमं चतुरस्रंततःकुर्याद्दंतवेतुकमुत्तमं व्रीहितंडुल
राशीश्चतन्मध्येचतुकूर्चकं कूर्चोपरिसुसंस्थाप्यकलशंधान्यपूरितं कलशोपरिसंस्थाप्यवस्त्रपूर्णमनुत्तमं त
स्योपरिस्थाप्यसौवर्णप्रतिमेशिवयोःशुभे निधायपूजयेद्भक्त्यायथाविभवविस्तरं पंचामृतैस्तुसंस्नाप्यतथाशुद्धो
दकेन रुद्रैकादशकंजप्त्वापंचाक्षरंतथाष्टकं अभिमंत्र्यपुनःस्थाप्यपीठेहेममयेर्चयेत् स्वयंशुद्धासमासीनो
धौतशुक्लांबरःसुधीः पीठमामंत्र्यमंत्रेणप्राणायामान्समाचरेत् संकल्पंप्रवदेत्तत्र शिवाभ्यांविहितांजलिः
यानिपापानिघोराणिजन्मांतरशतेषुमे तेषांसर्वविनाशायशिवपूजांसमाचरेत् सौभाग्यविजयारोग्य

व्र. अ. ८ धर्मैश्वर्याभिवृद्धये स्वर्गापवर्गसिद्ध्यर्थं कुर्यादीशिवपूजनं इति संकल्पमुच्चार्य यथावत्समाहितः
अंगन्यासं ततः कृत्वा ध्यायेदीशं सपार्वतीं कुंदेंदुधवलाकारं नागाभरणभूषितं वराभयहस्तं च बिभ्राणं
परशुं मृगं सूर्यकोटिप्रतीकाशं जगदानंदकारकं जाह्नवीजलसंसिक्तदीर्घपिंगजटाधरं उरगेंद्रफणाकृ
तमहामुकुटभूषितं सीतांशुखंडविलसत्किरीटांगदभूषणं उन्मीलद्भालनयनं तथा सूर्येंदुलोचनं नील
कंठं चतुर्बाहुं गजेंद्राजिनवाससं रत्नसिंहासनासीनं नानाभरणभूषितं देवीं चादिव्याभरणां बालाख्या
युतद्युतिं बालकेशीं च तन्वंगीं बालसीतांशुशेखरां पाशांकुशाभयवरान्बिभ्रतीं च चतुर्भुजां प्रसन्नासु
मुखीं मंबां लीलारसविहारिणीं लसत्कुरवकाशोकपुन्नागचूतचंपकैः लतावतंसामुत्फुल्लमल्लिकाकलिकाल शिव
कां कांचीकलापपर्यस्तजघनाभोगशालिनीं उदारकिंकिणीश्रेणीनूपुराद्यपस्व[illegible] गंडमंडलसंसिक्त
रत्नकुंडलरोचिषां बिंबाधरां चरक्ताक्षीं लसद्दशनकुड्मलां महाहाररत्नग्रैवेय[illegible]मालिनीं वरमा

णिक्यरुचिरां कंकणांगदमुद्रिकां रत्नांशुकपरीधानां रत्नमाल्यानुलेपनां उद्यतीन[illegible]दितां भोज्यकु
न्तलां श्रीलालोलाक्षितापांगीं भक्तानुग्रहकारिणीं एवं ध्यात्वा तु हृत्पद्मे जगतः [illegible]शिवौ जद्मानदा
त्मकं मंत्रं तदंते बहिरर्चयेत् आवाह्य प्रतिमायुग्मे कल्पयेदासनादिकं अर्घ्यं दत्वा तु शिवयोर्मंत्रेणानेन
मंत्रवित् नमस्ते पार्वतीकांत त्रैलोक्यवरदाशिव त्र्यंबक महादेव गृहाणार्घ्यं नमोऽस्तु ते इति त्रिवारमुच्चार्य द
द्यादर्घ्यं समाहितः गंधपुष्पाक्षतान्सम्यक् धूपदीपान्प्रदापयेत् नैवेद्यं पायसान्नेन घृतान्नं परिकल्पयेत्
जुहुयान्मूलमंत्रेण हविषाष्टोत्तरं शतं ततउत्तायं नैवेद्यधूपनीराजनादिकं कृत्वा निवेद्य तांबूलं नमस्कुर्या
समाहितः अथाभ्यर्च्योपहारैश्चापूजयेद्दंपतीन् एवं सायंतनीं पूजां कृत्वा संयमादितः भुंजीत वाग्यतो
रात्रौ हविष्यं क्षीरसंपाचितं एवं संवत्सरं कुर्याद्भूतपक्षद्वये बुधः ततः संवत्सरे विप्राः पूर्णे व्रतोद्यापनमा
चरेत् स्नानरुद्रादिजप्तेन स्नापयेत्प्रतिमे जलैः आगमोक्तेन मंत्रेण पूजयेद्गिरिजाशिवौ संपूज्य च सुवर्णा

ब्रं॰ खं॰ ७१ चकलशंप्रतिमान्वितं दत्वाचार्याय महते सदाचाररताय च ब्राह्मणान्भोजयेद्भक्त्या यथाशक्त्याभिपूजयेत् दद्या
७२ च दक्षिणां तेभ्यो गोहिरण्याम्बरादिकं पूजयित्वाभ्यनुज्ञातः सह स्वजनबंधुभिः एवं यः कुरुते भक्त्या व्रतं त्रैलोक्यवि
श्रुतं त्रिःसप्तकुलमुद्धृत्य भुक्त्वा भोगान्यथेप्सितान् इंद्रादिलोकपालानां स्थानेषु रमते चिरं ब्रह्मलोके च रमते
विष्णुलोके च शाश्वतं शिवलोकमथासाद्य तत्र कल्पशतं पुनः भुक्त्वा भोगान्सुविपुलांश्चिवमेव प्रपद्यते म
हाव्रतमिदं भद्रे त्वमपि श्रद्धया चर अतीव दुर्लभमपि लप्स्यसे च मनोरथं इत्यादिष्टा मुनींद्रेण सा बाला मुदि
तान्तरा प्रत्यगृह्णात्सुविस्रब्धा तद्वाक्यं सुमनोरमं अथ तस्याः समायाताः पिता माता सहोदराः तं मुनिं सुखमा
सीनं ददृशुः कृतभोजनं सहसागत्य ते सर्वे नमश्चक्रुर्महात्मने प्रसीद नः प्रसीदेति गृणंतः पर्यपूजयन् श्रुत्वा च शिवराम॰
ते तया साध्व्या पूजितं परमं मुनिं अनुग्रहं कृतं तस्य कृत्वा हर्षपरं ययुः ते कृतांजलयः [..]र्यपृच्छुर्मुनिपुंगवं ७२
अद्य धन्या वयं सर्वे त्वदागमनमात्रतः पावितं नः कुलं सर्वं गृहं चेसफलीकृतं इयं च शारदा [..] नि[illegible]त्यमागता

केनापि कर्मभावेन दुर्विलंघ्येन भर्तृयसा सेयाद्य तव पादाब्जं प्रपन्ना शरणं सती इमां समुद्धर [..]गराद्दुःखसाग
रात् त्वयापि तावदत्रैव स्थातव्यं नो गृहांतिके अस्मिन्गृहमठे रम्ये स्नानसंध्याजपार्चिते [..]ल्लोच भगवन्
कुर्वीनत्वत्परा चैनं व्रतं त्वत्सन्निधावेव चरिष्यति महामुने यावत्समाप्तिमायाति व्रतमस्यास्तदंतिके उषित्वाता
वदत्रैव कृतार्थान्कुरु नो मुने एवमभ्यर्थितः सर्वैस्तथाभ्यात्तजनादिभिः तथेति स मुनिश्रेष्ठस्तत्रोवास मठे शुभे
सापि तेनोपदिष्टेन मार्गेण गिरिजाशिवौ अर्चयंती व्रतं सम्यक्चचार विमला सती इति श्री स्कंद॰ ब्रह्मोत्त॰
उमामहेश्वरव्रतकथनं नामाष्टादशोध्यायः ॥ सूत उवाच एवं महाव्रतं तस्याश्चरंत्या गुरुसन्निधौ सव
त्सरो व्यतीयाय नियमासक्तचेतसः वत्सरांते तु सा बाला नत्रैव पितृमंदिरे चकारोद्यापने सम्यग्विप्रभोजनपूर्वकं दत्वा
च दक्षिणां तेभ्यो ब्राह्मणेभ्यो यथार्हतः विसृज्य तान्नमस्कृत्य पित्रोर्मातुरभिनंदिता उपोषिता दिनेनस्मिन्नयनिय
ममासिष्ठता जपनापपरं त्वमुपदिष्टं महात्मना अथ प्रदोषसमये संप्राप्ते पूज्य केशरं तस्मिन्गृहांतिकमठे गुरो
ब्र॰ खं॰ ७६ स्तस्य च सन्निधौ जपध्यानपरा नित्यं पूजयामास पार्वतीं तस्याश्च भक्त्या व्रतभाविता या मुनेस्तपोयोगसमाधिना

ब्र॰ खं॰ २९ व तुष्टा भवानी जगदेकमाता प्रादुर्बभूवाद्रि दयार्द्रमूर्तिः प्रादुर्भूता यदा गौरी तयोरग्रे जगन्मयी अंघोपिनस्थाणादे
वमुनिः प्रापदृष्टुयं ताभीष्टं जगन्मात्री प्रादुर्भूता पुरःस्थिता निपेततुस्तत्पदयोः समुनिः सा च कन्यका ॥
तौ सद्भावाचलितामलाशयावानंददबाष्पाश्रितसर्वगात्रौ उत्थाप्य देवी स्वपयापरिप्लुताप्रेम्णा बभाषे मृदुवल्गु
भाषिणी प्रीतास्मि ते मुनिश्रेष्ठ वत्से तुष्टास्मि तेऽनघ किं वाञ्छस्यभिमतं देवानामपि दुर्लभं मुनिः एषा च शारदा
नाम कन्या विगतभर्तृका मया प्रतिकृतं चास्ये तुष्टेन गतचक्षुषा सहभर्त्रा चिरं कालं विहृत्य सुखमनुत्तमं लभ
स्वतिमया प्रार्थितं सत्यं कुरु नमोऽस्तुते दृव्यु॰ एषा पूर्वभवे बालाद्रविडस्य द्विजन्मनः आसीद्द्वितीय दयिता भा
मिनी नाम विख्याता सा भर्तुः प्रेयसी नित्यं रूपमाधुर्यपेशला भर्तारं वशमानिन्ये रूपवश्यादिकैः स्तवैः अस्यां
निषिक्तहृदयः स विप्रो मोहयंत्रितः कदाचिदपि नो वागाज्ज्येष्ठपत्नीं पतिव्रता अनभ्यागमनाद्भर्तुः सा नारी पुत्र राम॰
वर्जिता सा दाशोकेन संतप्ता कालेन निधनं गता अस्या गृहसमीपस्थोऽयः कश्चिद्ब्राह्मणो [illegible] युवा इमां वीक्ष्याथ
सार्वंगी कामार्तः करमग्रहीत् अनया रोषताम्राक्ष्या स विप्रस्त्वधीरितः इमो स्मरन्न [illegible] निधनं समपद्यत

एषा संमोह्य भर्तारं ज्येष्ठपत्न्यां पराङ्मुखं चकार तेन पापेन भवेऽस्मिन्विधवाऽभवत् याः कुर्वंति [illegible] क जायापत्योर्वि
प्रियं तासां कौमारवैधव्यमेकविंशतिजन्मनि यदेतया पूर्वभवे मत्पूजा महती कृता तेन पुण्येन तत [illegible] नेतद्देवीह यावि
प्याविरहार्तः सन्नयतः कामविमोहितः सोऽस्याः पाणिग्रहं कृत्वा भवेऽस्मिन्निधनं गतः प्राग्जन्मपा [illegible] यस्याः पांड्यराष्ट्रभुवो
भुना जातो विप्रवरः श्रीमान्सदारः सपरिच्छदः तेन भर्त्रा प्रतिनिशं सैषा प्रेम्णाभिसंगता स्वप्ने रतिसुखं भुंक्ते श्रेष्ठं जागर
णादपि षष्ट्यूनत्रिशतयोजनदूरसंस्थोऽदेशाद्दिति द्विजवरः स च कारगत्या एनां वधूं प्रतिनिशं मनसोऽभिरामां स्वप्नेषु
पश्यति चिरं रतिमादधानः एषापि भवे स्वप्नसंगत्या पत्युः प्रतिनिशं सती कालेन लप्स्यते पुत्रं वेदवेदांगपारगं एतस्या
ऽनयं जातमात्रस्तनोऽस्मरसंगमात् सापि विप्रानिशं स्वप्ने द्रक्ष्यति प्रेमभाविता अनया रोधिता साऽहं भवे पूर्वभवे मु
ने अस्य वरदानार्थं प्रादुर्भूतास्मि सांप्रतं अथावाच महादेवी तां बालां प्रति सादरं अयि वत्से महाभागे शृणु मे
परमं वचः यदा कदापि भर्तारं क्वापि देशपुरातनं द्रक्ष्यसि स्वप्नदृष्टं प्राक् कथ्यासि त्वं विचक्षणा त्वां द्रक्ष्यति सवि
प्रोऽपि सचिरं स्वप्नभाविताम् तदा परस्परालापो युवयोः संभविष्यतः तदा स्वतनयं सद्वंतस्मै देहि बहुश्रुतं फलम्

ब्रं॰अ॰८
७४

स्यवतस्याथतस्यहस्तेसमर्पय तदाप्रभृतितस्यैववशेतिष्ठसामध्यमे युवयोर्दौहिकः संगामाभ्र[illegible]स्वप्नगतो
हिते कालात्पंचत्वमापन्नेतस्मिन्ब्राह्मणसत्तमे अग्निंप्रविश्यतेनैवसहयास्यासिमत्परं पुत्रस्तेभविता साधु
सर्वलोकमनोरमः संपदश्चभविष्यंतिप्राप्स्यसेपरमंपदं इत्युक्त्वात्रिजगन्मातादत्त्वातस्यमनोरथं तयोःसंपश्य
तोरेयं तत्रैवादर्शनंगता सापिबालावरंलब्ध्वापार्वत्याःकरुणानिधेः अवापपरमानंदंपूजयामासतंगुरुं तस्यांरा
त्र्यां व्यतीतायांसमुनिर्लब्धलोचनः तस्याःपित्राश्चतत्सर्वंरहस्यांतस्वधर्मवित् अथसचानुपामंत्र्यशारदापियश
स्विनी विधायानुग्रहंतेषां ययौस्वैरगतिर्मुनिः एवंदिनेषुगच्छत्सु सा बाला च प्रतीक्षति भर्तुःसमागमं लेभेस्व
प्नेसुखविधैर्भूनं गौर्यावरप्रदानेनशारदाविशदव्रता स्वागर्भेस्वप्नेपिभर्तुःसंगानुभावतः तांश्रुत्वाभर्तुर्विहि
तांशारदांगर्भिणींसतीं तेसर्वेधिग्गितिप्रोचुर्जारिणीतिजगुर्जनाः सर्पदष्टस्यतद्भर्तुर्यदि[illegible]कुलबांधवाः वा
तांदुःखप्रदांश्रुत्वाययुस्तास्तन्मंदिरं अथसर्वेसमायाताग्रामवृद्धाश्चपंडिताः सम[illegible]कुलवृद्धाः
समागताः अंतर्वत्नींसमाहूयशारदांविनताननां अतर्जयन्नुसंरब्धाः केचिदासन्[illegible] अयिजारिणि

राम॰
७४

दुर्बुद्धेकिमेतत्तेविचेष्टितं अस्मत्कुलस्यदुःकीर्तिर्हतत्वसासिबालिशे इतिसंतर्जयंतस्तेयाम[illegible]पिणाः सर्वेधिग
धिक्इतिप्रोचुः किंकुर्मः इतिवादिनः तत्रोचुःकेचनवृद्धातांबालांप्रीतिनिर्दयाः एषापापमतिबे[illegible]शकुलद्वयविनाशिनी
हत्वास्याःकेशवपनंछित्वा कर्णौचनासिकां निर्वास्यतांबहिर्ग्रामात्परित्यक्तास्मगोत्रतः इतिसर्वेसमालोच्यतांतथाकर्तु
मुद्यताः अथांतरिक्षसंभवाशुश्रुवेवागगोचरा अनयानकृतंपापंचनैवकुलदूषणं व्रतयोगेनचाप्यासीत्सुचरित्रेयमं
गना इतःपरंइमांनारींजारिणीतिवदंतिये तेषांदोषविमूढानांसद्योजिह्वाविदीर्यते इत्थंतरिक्षजनितांवाणींश्रुत्वा
शरीरिणीं सर्वेप्रजल्पुस्तस्याजननीजनकादयः ततःससंभ्रमासर्वेग्रामवृद्धाःसभाजनाः मुहूर्तंमौनमा
लंब्यभीतास्तस्थुरधोमुखाः नत्वकेचिद्विश्वासान्मिथ्यावाणीत्ववादिषु तेषांजिह्वाद्विधाभिन्नाववमुस्तेऽसृग
णान् ततःसंपूजयामासुस्तांबालांज्ञातिबांधवाः बंधुप्रियाश्चवृद्धाश्चशशंसुःसाधुसाध्विति मुमुचुःकेचिदानंदबा
ष्पंविद्वत्कुलोत्तमाः कुलस्त्रियश्चमुदितातामालिंग्यसमाश्वसन् अथतत्रापरेप्रोचुर्दैवंवदतिनान्यथा कथमेषाद

ब्रं॰ अ॰ ९ ध्योगर्भः श्रीकान्तचालितापि च इतिसर्वान्सभ्यजना

७५

राम
७५

पुत्री

ध्योगर्भः श्रीकान्तचालितापि च इ(मान्)सर्वान्सभ्यजनान्संशयाविष्टचेतसः विलोक्य रघुनन्दनैको प्रश्न बलोकनैतत्वाविन्
मायामयमिदं विश्वं दृश्यते श्रूयते च यत् किंभाव्यं किंनु भाव्यं वा संसारभ्रमाकुले अनिरूप्यमस्तार्थं मायायाोज
यति स्फुटं ईश्वरस्य वशे माया तस्य को वेद चेष्टितं यूपकेतोश्च राजर्षेः ॥ स्मिः शुक्रं निपतितं जले स शुक्रं तज्जलं पी
त्वा विवश्या गर्भो दधौ किल मुनेर्विभाण्डकस्यापि शुक्रं पीत्वा सहाम्भसा हरिणी गर्भिणी भूत्वा ऋष्यशृंगमसूयत सत्या
प्रसूयतां धारा ज्ञेया लोकस्य गामगाना तद्धाणाद्गर्भिणी भूत्वा मनुं प्रासूत नामसं तथा सत्यवतीनारी शफरीगर्भ
सम्भवा तथैव महिषीगर्भो जातोयं महिषासुरः तथा संततिपरानार्थः कारुण्याद्गर्भसंभवः बलोपि वरुदेवेन रा
हिण्यास्तनयोभवत् देवर्षीणां महर्षीणां शापेन च वरेण च अयुक्तमपि यत्कर्म युज्यते नात्र संशयः शांबस्य जठरा
ज्जातमुसलं मुनिशापतः युवनाश्वस्य गर्भोभून्मनुर्नाम त्र गौरवात् नूनमेषापि कल्याणी महर्षेः व्यासदेवतः महा
व्रतानुभावाच्च घनेगर्भं मनिनां धारिता अस्मिन्नर्थे रहस्यं नो सत्यं पृच्छन्तु योषितः ततो निश्चयं संदेहो भविष्यति महा

प्र. रव. ९ जनाः ततस्तद्वनोत्सवतामएकस्त्रियोमिथः ततःप्रशंसन्सर्वे शारदान्महाव्रतं विज्ञातार्थास्ततः सर्वे मान्य त्वान
तःसतीं मात्मा॥नाःप्रशंसतःप्रययुःस्वस्वमालयं अथकाले महाप्राप्ते शारदाविमलाशया प्रसूतेतनयं बाला
बालार्कसमतेजसं सकुमारोमहोदारलक्षणःसकलेक्षणः अवापमहतीविद्यां बाल्यएवमहामतिः अथोपनीतो
गुरुणाकालेलोकमनोरमःसशारदस्यएवेतिलोकेख्यातिमवापह ऋग्वेदमष्टमेवर्षेनवमेयजुषांगणे दशमेसामवे
दंचलीलयाव्याप्यससुधीः अथत्रिलोकमहतीसंप्राप्तेशिवपर्वणि गोकर्णंप्रययुःसर्वेजनाः सर्वत्रवासिनः श्या
ददापिस्वपुत्रेणासहबंधुजनेनच संहितापित्रमातन्यांगोकर्णंप्रययौसती तत्रापश्यत्समायांतं सदास्वप्नपुर
स्थितं पूर्वजन्मनिभित्ता रैद्विजबंधुजनान्वितं तंदृष्ट्वाप्रेमनिर्विष्टपुलकांचितविग्रहा विरूढबाष्पप्रसंसैरातस्थौत राम
न्यस्तलोचना साचिविप्रोप्यतां दृष्ट्वासुरूपांचारुलक्षणां स्वप्नेसमाभुज्यमानामामनोरतिदायिनीं तंकुमारमीप
स्वप्नेदृष्टमात्म शरीरजं विलोक्यविस्मयाविष्टोऽस्मरंतिकमुपाययौ भद्रेत्वांप्रष्टुमिच्छामिकिंचिन्मनसिस्थितं इति
प्रथममाभाष्यरहस्थानीनिनायतां कात्वंकथयनामाकभार्याकस्यासिसुव्रते कोदेशः कत्यना[illegible]किंनाम सश्मेत्स्वयी

वतां इतितेनसमापृष्टासानारीबाष्पलोचना व्याजहारात्मनोवृत्तं वाल्येवैधव्यकारणं पुनःपप्रच्छतांबालोपुत्रः कस्या
यमुत्तमः कथंधृतोयंजठरेबालकश्चंद्रसन्निभः शारदा॰ एषमेतनयःस्वामिन्सर्वविद्याविशारदः शारदयइति
प्रोक्तोममनाम्नैवकल्पितः इतितस्यावचःश्रुत्वाविहस्यब्राह्मणोत्तमः प्रोवाचकिंदृष्टाः कोस्तिहि चरित्रंतवभामिनि पाणिग्र
हणमात्रेतत्वाभर्तामृतःकिल कथंचायंसुतोजातस्तस्यकारणमुच्यतां इतितेनोदितावाणीमाकर्ण्यातीवलज्जिता स
णांनम्रमुखीभूत्वाधैर्यादिदमभाषत तत्स्वप्नपरिहासोवा तथाचमांवक्षिमहामते त्वामहंवेद्मितत्त्वार्थेऽस्मिन्प्रमाणंमनआव
यातः इत्युक्तासर्वमाचख्यौस्वाप्नंवरादिकं व्रतंतस्यास्तकुमारंचदर्शयत्तस्मैघृतव्रता सोपिप्रमुदितोविप्रः कुमारंप्रतिगृह्यतां
पित्रास्तत्संमतेनैवतांनिनायनिजालयं सापिस्थित्वावहूनब्दांस्तस्यविप्रस्यमंदिरे तस्मिन्कालवशंप्राप्ते प्रविश्याग्निं
२ तमंगात्व ततस्तौदंपतीभूत्वाविमानंदिव्यमास्थितौ दिव्यभोगसमायुक्तौजग्मतुःशिवमंदिरं इत्येतच्छिवमाहात्म्यम
यासमनुवर्णितं पठतांशृण्वतांसद्यो भुक्तिमुक्तिफलप्रदं आयुरारोग्यसंपत्तिधनधान्यविवर्धनं स्त्रीणांमंग
लसौभाग्यसंतानसुखसाधनं एतन्महाख्यानमघौघनाशनंगौरीमहेशव्रतपुण्यकीर्तनं भक्त्यासदायःश्रृणुया

ब्र॰ खं॰

७०

संकीर्तयेद्भुक्त्वा स भोगानिदमेव शाश्वतं इति श्रीस्कंदपु॰ ब्रह्मोत्तर॰ शारदाख्यानं एकोनविंशोध्यायः ॥

सूतः अथ रुद्राक्षमाहात्म्यं वर्णयामि समासतः सर्वपापक्षयकरं पठतां शृण्वतामपि अभक्तो वापि भक्तो
वा नीचो नीचतरोपि वा रुद्राक्षं धारयेद्यस्तु मुच्यते सर्वपातकैः रुद्राक्षधारणं पुण्यं केन वा सदृशं भवेत् महाव्रत
मिदं प्राहुर्मुनयः तत्त्वदर्शिनः सहस्रं धारयेद्यस्तु रुद्राक्षाणां धृतव्रतः तं नमंति सुराः सर्वे यथा रुद्रस्तथै
व सः अभावे च सहस्रस्य बाह्वोः षोडश षोडश एकं शिखायां करयोर्द्वादश द्वादशैव तु द्वात्रिंशत्कंठदेशे
तु चत्वारिंशच्च मस्तके एकैककर्णयोः षट् षट् वक्षस्यष्टाधिकं शतं यो धारयति रुद्राक्षान् रुद्रवत्सोपि पूज्य
ते मुक्ताप्रवालस्फटिकरूप्यवैडूर्यकांचनैः समेतान्धारयेद्यस्तु रुद्राक्षान्स शिवो भवेत् केवलानपि
रुद्राक्षान्यपालभ्यान्बिभर्ति यः तं न स्पृशंति पापानि तमांसीव विभावसुं रुद्राक्षमालया जप्तो मंत्रोनंत
फलप्रदः रुद्राक्षं मस्तके कृत्वा जपेच्च सुसमाहितः अरुद्राक्षो जपः पुंसां तावन्मात्रफलप्रदः यस्यांगे ना
स्ति रुद्राक्ष एकोपि बहुपुण्यदः तस्य जन्म निरर्थं स्यात्त्रिपुंड्ररहितं यथा रुद्राक्षं मस्तके कृत्वा शिरःस्नानं करो
ति

श्रीराम॰

७०

समाचरेत् गंगास्नानफलं तस्य जायते नात्र संशयः रुद्राक्षं पूजयेद्यस्तु विनीतो वाभिषेचनैः [illegible]लिंगपूजायां तद
वाप्नोति निश्चितं एकवक्त्रः पंचवक्त्रो एकादशमुखाः परे चतुर्दशमुखाश्चैव रुद्राक्षा लोकपूजिताः भक्त्या संपूजिता नित्यं
रुद्राक्षः शंकरात्मकः दरिद्रं वापि कुरुते राजराजसमश्रियं अत्रेदं पुण्यमाहात्म्यं वर्णयंति मनीषिणः महापापक्षयकरं श्रव
णात्कीर्तनादपि राजा काश्मीरदेशस्य भद्रसेन इति श्रुतः तस्य पुत्रोभवद्धीमान्सुधर्मो नाम वीर्यवान् बभूव राज
पुत्रस्य सखा परमशोभनः तस्यामात्यसुतः कश्चित्तारको नाम वीर्यवान् तावुभौ परमस्निग्धौ कुमारौ रूपसुंदरौ वि
द्याभ्यासवशौ बाल्ये सह क्रीडां प्रचक्रतुः सर्वदा सर्वगात्रेषु रुद्राक्षकृतभूषणौ विचेरतुरुदारांगौ सततं भस्मधारिणौ
हारकेयूरकटककुंडलादिविभूषणं हेमरत्नमयं त्यक्त्वा रुद्राक्षान्दधतुस्तु तौ रुद्रमालिनौ नित्यं रुद्राक्षकरकंकणौ रुद्रा
क्षाभरणाकंठौ हतरुद्राक्षकुंडलौ हेमरत्नाद्यलंकारं लोष्ठपाषाणदर्शिनौ बोध्यमानावपि सदा रुद्राक्षान्नामुंचतौ
तस्य काश्मीरराजस्य गृहं प्राप्तो यदृच्छया पराशरो मुनिवरो साक्षाद्देवः पितामहः तमर्चयित्वा विधिवद्राजा धर्मविदां
वरः पप्रच्छ मुनिमासीनं त्रिकालज्ञं पराशरं राजोवाच भगवन्नेष पुत्रो मे अन्यामात्यसुतः परः रुद्राक्षधारिणौ नित्यं

ब्रं॰मा॰२॰ रत्नाभरणविस्पृहौ शास्यमानावपि तदा रत्नाभरणधारिणौ विलोभितावनुनयै रुद्राक्षे चैव तत्परौ नापरिह्नावि
मौ बालौ कदाचित्केनचित् एष स्वाभाविकी ह्युक्तो यथा वा पूर्वभाविकी पराशरः शृणु राजन्प्रवक्ष्यामि तव
पुत्रस्य धीमतः तथा ह्यन्यं त्रिपुत्रस्य प्रवृत्तिर्विस्मयावहा नंदिग्रामे पुरा कश्चिन्महानंदेति विश्रुता बभूव वारवनिताम्नंगा
रलिलिता हृतिः छत्रं पूर्णेन्दुसंकाशं यानं स्वर्णविभूषितं चामराणि सुदण्डानि पादुके च हिरण्मये अंबराणि विचित्राणि
महार्हाणि च मंदिरं च चंद्ररश्मिनिभाः शय्याः पर्यंकाश्च हिरण्मयाः शावो महिष्यः शतशो दासीनां च बहुसंमताः स
र्वाभरणदीप्तांग्यो दासीश्च नवयौवनाः भूषणानि महार्हाणि नवरत्नोज्वलानि च गंधकुंकुमकस्तूरीकर्पूरागुरुरो
चनं चित्रमाल्यावतंसाश्च यथेष्टं चेष्ट भोजनं नानाचित्रवितानाढ्यं नानाधान्यमयं गृहं एवं विभवसंपन्ना सा राम·
वेश्या कामचारिणी रुद्राक्षैर्भूषयित्वैकं मर्कटं चैव कुक्कुटं बहुरत्नसहस्राणां कोटि[illegible]न्याधिकं धनं करता
लैश्च गीतैश्च सदा नर्तयति द्वयं पुनश्च विहसत्युच्चैः सखिभिः परिवारिता रुद्राक्षैः [illegible]के[illegible]रकर्णाभरणकुं

डलः मर्कटः शिक्षया तस्याः पुरो नृत्यति बालवत् शिरसाग्रे बहुरुद्राक्षः कुक्कुटः कपिना सह [illegible] नृत्यति नृत्यज्ञः
पश्यतां चित्तमाहरन् एकदा भवने तस्याः कश्चिद्वैश्यः शिवव्रती आजगाम स रुद्राक्षः त्रिपुण्ड्रो जटिलः छली स
बिभ्रद्दक्षविशदं प्रकोष्ठे रत्नकंकणं महारत्नपरिस्तीर्णं ज्वलंतं तरुणार्कवत् तमागतं सा गणिका संपूज्य परया
मुदा तत्प्रकोष्ठगतं वीक्ष्य कंकणं प्राह विस्मिता सर्वरत्नमयं दिव्यं कंकणं ते करे स्थितं मनोहरतिमे साधु दिव्य
स्त्रीभूषणोचितं इति सा नवरत्नाढ्ये स्पृहां कंकणभूषणे वीक्ष्योदारमतिर्वैश्यः सस्मितं समभाषत अस्मि
न्वलंकरे दिव्ये यदि ते सस्पृहं मनः तद्गृहाण च सुप्रीता मौल्यमस्य ददासि किं वेश्या· वयं हि स्वैरचारिण्यो वेश्या
स्तु न पतिव्रताः अस्मात्कुलोचितो धर्मो व्यभिचारो न संशयः तथास्तु यदि ते चित्तं ददासि करकंकणं दिन
त्रयमहोरात्रं तव पत्नी भवाम्यहं वैश्यः· तथास्तु वचनं सत्यं पतिस्ते वारवल्लभे ददामि रत्नवलयं त्रिरात्रं भ
वमेव च एतस्मिन्व्यवहारे तु प्रमाणं शिवभास्करौ त्रिवारं सत्यमित्युक्त्वा हृदयं मे स्पृश प्रिये वेश्या· दिन

ब्रह्मो॰ त्र्यमहोरात्रं पत्नीभूत्वा तव प्रभो सहधर्मं चरामीति साप्ययमस्पृशत् अथ स्मै तत्र वैश्यस्तु प्रददौ रत्नकंकणं लिंगं
७८ रत्नमयं तस्या हस्ते दत्त्वा समब्रवीत् इदं रत्नमयं लिंगं शैवं मत्प्राणसन्निभं रक्षणीयं त्वया भद्रे अस्य हानिर्मृति
र्मम एवमस्त्विति सा कांता लिंगमादाय रत्नजं नाट्यमंडपिकामध्ये स्तंभे निधाय प्राविशद्गृहं सा तत्र संगता रा
त्रौ वैश्येन विटधर्मिणा सुखं सुष्वाप पर्यंके मृदुपुष्पोपशोभिते ततो निशीथसमये नाट्यमंडपिकांतरे अकस्मा
दुत्थितो वह्निस्तेन च सहावरणात् मंडपस्य समानेतु सहसोत्थाय संभ्रमात् सा वेश्या मर्कटं तत्र मोचयामास बंधना
त् मर्कटो मुक्तबंधस्तु कुक्कुटेन सहाधुना भीतो दूरं प्रदुद्राव विधूयाग्निकणान्बहून् स्तंभेन सह निर्दग्धं तल्लिंगं रा
कल्कीहतं दृष्ट्वा वेश्या त्ववैश्यश्च दुरंतं दुःखमापतुः दग्धं प्राप्तसमं लिंगं दृष्ट्वा वैश्यपतिस्तदा स्वयं संप्राप्तनिर्वाणे शिव
मरणाय मतिं दध्रे निर्विण्णो नितरां खेदात् दूयमाना महादुःखिता शिवलिंगे तु निर्भिन्ने न जीवितुमुत्सहे चिता ७८
कारय मे भद्रे तव भृत्यैर्बलाधिकैः शिवे मनः समावेश्य प्रविशामि हुताशनं यदि ब्रह्मा [illegible] वा वारयेयुः सम

स्त्वां तथाप्यस्मिन्क्षणे धीरः प्रविश्याग्निं त्यजाम्यसून् तमेवं दृढनिर्बंधं सा विज्ञाय स्वसु[illegible] । स्वभृत्यैः कारया
मास चितां स्वनगराद्बहिः ततः स वैश्यः शिवभक्तिपूतः प्रदक्षिणीकृत्य समिद्धमग्निं विवेश पश्यत्सु जनेषु धीरः सा चानु
तापं युवतिः प्रपेदे अथ सा विस्मिता नारी कृत्वा धर्मं सुनिर्मलं सर्वान्बंधुजनान्वीक्ष्य वभाषे करुणं वचः कैः रत्नकंकण
केयूरमूल्यास्त्यमुद्राहृतं दिनत्रयमहं पत्नी वैश्यस्यामुष्य संमता कर्मणा मत्कृतेनायं मृतो वैश्यः शिवव्रती तस्मादहं
भि प्रवेक्ष्यामि सहानेन हुताशनं सा धर्मचारिणीत्युक्तं सत्यं तर्हि न नश्यति सत्येन वेदास्तिष्ठंति देवास्त्रिभुवनेश्वराः सत्याश्रयः
परो धर्मः सत्ये सर्वं प्रतिष्ठितं सत्येन स्वर्गमोक्षश्च नासत्येन परा गतिः तस्मात्सत्यं समाश्रित्य प्रवेक्ष्यामि हुताशनं इति सा
दृढनिर्बंधा वार्यमाणापि बंधुभिः सत्यलोपभयान्नारी प्राणांस्त्यक्तुं मनो दधे सर्वस्वं द्विजमुख्येभ्यो दत्त्वा ध्यात्वा सदाशि
वं तमग्निं त्रिः परिक्रम्य प्रवेशाभिमुखी स्थिता तां पतंतीं समिद्धाग्नौ त्वत्पादार्पितमानसां वारयामास विश्वात्मा प्रादुर्भूत
शिवः स्वयं सा तं विलोक्याखिलदेवदेवं त्रिलोचनं चंद्रकलावतंसं शशांकसूर्यानलकोटिभासं स्तब्धेव भीतेव तथैव तस्थौ॰

बृ.२० नोविद्धलांपरित्रस्तांवेपमानांजडीकृतां. तामाश्वास्यगलद्बाष्पांकरेणस्याब्रवीद्वचः सतीधर्मवतीधैर्यंभक्तिंचमयिनिश्चलां
परीक्षितुंत्वत्सकाशंवेश्योभूत्वासमागतः माययाग्निंसमाच्छायदग्ध्वानाट्यमंडपं दग्धंकृत्वात्वनलिंगंप्रविष्टासिमि
हुताशने वेश्याःकैतवकारिण्यः स्वैरिण्योजनवंचकाः सात्वंसत्यमनुद्धस्त्यप्रविष्टासिमयासह अतस्तेसंप्रदास्या
मिभोगांश्चिरस्थदुर्लभान् आयुश्चपरमंदीर्घमारोग्यंचप्रजोन्नतिं यद्यदिच्छसिसुश्रोणीतत्तद्वरददामिते इतिब्रुवतिगौ
रीशेसावेश्याप्रत्यभाषत नमेवांछास्तिभोगेषुस्वर्गभूमौरसातले त्वत्पादांबुजस्पर्शादन्यत्किंचिन्नकामये एतन्म
स्याश्चदासायेचान्येममबांधवाः सर्वेत्वदर्चनपरास्त्वयिसन्न्यस्तचेतसः सर्वानेतान्मयासार्द्धंनीत्वातवपरंपदं पुनर्जन्मभयं
भ्यारंविमोचयनमोस्तुते तथेतितस्यावचनंप्रतिनंद्यमहेश्वरः तान्सर्वांश्चतयासार्द्धंनिनायात्मपरंपदं नाट्यमंडपिका राम.
दाहेनदग्धोविघ्नोपुरा तत्रावशिष्टौतावेवकुक्कुटमर्कटस्तथा कालेननिधनंप्राप्तःसतस्यानाट्यमर्कटः असौनव
कुमारोभूत्कुक्कुटोमंत्रिणःसुतः रुद्राक्षधारणोद्भूतात्पुण्यात्पूर्वभवार्जितात् कालेमहतिसं...जातोवर्ततेबालकाविमौ

पूर्वाभ्यासेनरुद्राक्षान्धत्तेशुद्धमानसौ अस्मिञ्जन्मनितौकंठेशिवंसंपूज्ययास्यतः एषाप्र...बालकयोःसमुदाहृता
तयावशिवभक्तायाः किमन्यच्छ्रोतुमिच्छसि ॥ इतिश्रीस्कंदपुराणेब्रह्मो० रुद्राक्षधारणमाहा...नामविंशोध्यायः ॥
सूतः एवंब्रह्मर्षिणाप्रोक्तंवाक्यंपीयूषसन्निभं आगत्यमुदितोराजाप्रांजलिःपुनरब्रवीत् राजो० अहोहासं
गमात्पूर्वंसावशेषार्थसाधनः कामधेनुरिवाभीष्टदोश्रीसर्वजनस्यहि त्वयमायातमोनष्टंज्ञानदृष्टिःप्रकाशिता तव
दर्शनमात्रेणप्राप्तोधर्मविदुत्तम श्रुतंचपूर्वचरितंबालकयोःसम्यगेतयोः भविष्यदपिएतत्मिमसुत्राचरणंमुने अस्यायुःक
तिवर्षाणि भाग्यंचकीदृशं विद्याकीर्तिश्चभक्तिश्चश्रद्धाचकस्यकीदृशी एतत्सर्वमशेषेणमुनेत्वंवक्तुमर्हसि तवशिष्यो
स्मिभक्तोस्मिशरणंत्वांगतोस्म्यहं पराशरः अत्राचार्याहियत्किंचित्कथंशक्नोमिशंसितुं यत्कृत्वाधृतिमंनोपिवि
चारंप्राप्नुयुर्नराः तथापिनिर्विकल्पेनभावेनपरिकल्पितः अवाच्यमपिवक्ष्यामिनवक्तोसान्महीपते अमुष्यत्वत्कुमार
स्यवर्षाणिद्वादशायुः अतःपरंप्रपद्यतस ×एष× मरिष्यतिसम्मतिं इतितस्यवचःश्रुत्वाकालकूटमिवोदितं मूर्छि
तःसहसाभूमौपपातनृपतिःभुवा समुत्थाप्यसमाश्वास्यसमुनिःकरुणार्द्रधीः उवाचमाभैर्नृपतेयुनर्वक्ष्यामितेहितं।

श्रु. रु.
८७

समातुरानिरालोकं यदेकं निष्कलं परं चिदानंदमयं ज्योतिः स आद्यः केवलः शिवः स सर्वादौ सजाठपस्य स्वा ब्रह्मा
णमात्मना स्फटिकमणिमुक्तायतस्मै वेदांश्च दत्तवान् पुनश्च जगतामीशः आत्मतत्त्वैकसंग्रहं सर्वोपनिषदां सा
रं रुद्राध्यायं च दत्तवान् यदेवमव्ययं साक्षाद्ब्रह्म ज्योतिः सनातनं शिवात्मकं परं सारं रुद्राध्यायप्रतिष्ठितं स आत्म
भूः सृजद्विश्वं चतुर्भिर्वदनैर्विराट् ससर्ज वेदांश्चतुरो लोकानां स्थितिहेतवे तत्रायं यजुषां मध्ये ब्रह्मणो दक्षिणान्मुखा
अशेषोपनिषत्सार रुद्राध्यायः समुद्धृतः स एष ऋषिभिः सर्वैर्महर्षिभिस्त्रिपुरागमैः सह देवैश्च धृतस्तेभ्यस्तत्कृष्या
जगद्धितं तत्क्रियेत्येवं तस्य रस्तत्क्रियेष्यश्च कमागमैः धृतो वेदात्मकः सोयं वेदसारः प्रसारितः एष एव परो मंत्रोऽय
मेव परं तपः रुद्राध्यायजपः पुंसां परं कैवल्यसाधनं ये महापातकैर्युक्ता उपपातकिनश्च ये रुद्राध्यायजपात्सर्व राम.
ते यांति परमां गतिं भूयोपि ब्रह्मणा सृष्टाः सदसन्मिश्रयोनयः देवतिर्यङ्मनुष्याद्यास्ततः संपूरितं जगत् तेषां कर्मा ८७
णि सृष्टानि स्वजन्मानुगुणानि च लोकास्तेषु प्रवर्त्तंते भुंजते ते च तत्फलं लोकस्थितिप्रवाहाय [illegible] धर्मो प्रजापतेः स
यमश्च स सर्जाग्रे स्ववपुः पृष्ठभागतः धर्ममेवानुविंदंति पुण्यं विंदंति तत्फलं अधर्ममनुति[illegible]पफलभोगिनः पु

ण्यं पुण्यफलं स्वर्गो नरकस्तद्विपर्ययः तयोर्द्वावधिपौ तत्र ख्यातौ शांतमस्वांतकौ कामः क्रोधश्च [illegible] दमानादयः परे
अधर्मस्य सुता आसन्सर्वे नरकनायकाः गुरुतल्पसुरापानं तथान्यपुल्कसादयः कामस्य तन[illegible]ख्याताः परिकीर्तिताः
क्रोधात्पितृवधो जातस्तथा मातृवधः परैः ब्रह्महत्या स्वहत्यादि क्रोधस्य तनया ह्यमी देवस्वहरणं चैव ब्रह्मस्वहरण
स्तथा स्वर्णस्तेय इति स्पृते लोभस्य तनयाः स्मृx हxताः एतानाद्यस्तनयान्यमः पापस्य नायकान् नरकस्य विवृध्य
र्थं सोऽधिपत्यं चकार सः ते यमेन समादिष्टा नव पातकनायकाः यमं विज्ञापयामासुः सहान्यैरुपपातकैः जयदे
व महाजव वयं हि तव किंकराः नरकस्य विवृध्यर्थमधिकारः कृतस्त्वया अधुनावर्त्तितुं लोके न शक्ताः स्मो वयं प्र
भो रुद्राध्यायानुभावाच्च निर्दग्धाश्चैव दुद्रुताः ग्रामेग्रामे नदीकूले पुण्यपाठायनेषु च रुद्रजाप्यं च पर्याप्तं कथं लो
के चरेमहि प्रायश्चित्तं सहस्रं वा गणयामो न कर्हिचित् रुद्रजाप्याक्षराण्येव सोढुं वन न शक्नुमः महापा
तकमुख्यानामस्माकं लोकघातिनां रुद्रजाप्यभयं घोरं रुद्रजाप्यमतद्ध्रुवं अतोहं दर्शिवहं घोरं भस्मा

श्री रु कं व्यसनं महत् रुद्रजाप्येन संप्राप्तं शमनेतुं त्वमर्हसि इति विज्ञापितः साक्षाद्यमः पातकनायकः [illegible]ति माग

८ च्यत तस्मै सर्वं व्यजिज्ञपत् देवदेव जगन्नाथ त्वामहं शरणं व्रजे त्वया नियुक्तो मर्त्यानां निग्रहे पापकारिणां आ

धुना पापिनो मर्त्या न संति पृथिवीतले रुद्राध्यायेन निर्मुक्तं पातकानां महाकुलं पातकानां कुलेन च नरकः शून्यतां

गतः नरकः शून्यतां याते मम राज्यं हि निःफलं तस्मात्त्वयैव भगवन्नुपायः परिचिंत्यतां यथा मेन विहन्येत स्वामित्वं

मत्स्वं देहिनां इति विज्ञापितो धाता यमेन परिखिद्यता रुद्रजाप्य विघातार्थमुपायः परिकल्प्यत् अश्रद्धा

चैव दुर्मेधा मा विघाय [illegible] तेउभे श्रद्धा मेधाविघातिन्यो मर्त्येषु च मया जयत् ताभ्यां विमोहिता लोके रुद्रजा

प्यपराङ्मुखे यमः स्वस्थमना सासीद्धृतार्थश्च सोभवेत् पूर्वजन्मकृतैः पापैर्जायंते स्वल्पायुषो नराः तानि पापा रामः

नि नश्यंति रुद्रजाप्याच्च नान्यथा जीर्णेषु सर्वपापेषु दीर्घमायुर्बलं धृतिः आरोग्यं [illegible] ऐश्वर्यं वर्द्धते सर्व ८

देहिनां रुद्राध्यायेन यच्चैवं स्नापयंति महेश्वरं तज्जलैः कुर्वते स्नानं ते मृत्युं संतरं [illegible] पफ [illegible] भिजाप्य.

स्नानं कुर्वंति ये भक्त्या तेषां यमभयं नास्ति शिवलोकं व्रजंति ते शतरुद्राभिजाप्येन शतायुर्जायते [illegible] रमाना [illegible] मुनिः

शिवस्य दयितो भवेत् एष रुद्रायुतस्नानं करोतु तव पुत्रकः दशवर्षसहस्राणि मोदते भुवि शाश्व [illegible] बलैश्वर्यो

हन्त भ्रातुरनामयः निर्धूताशेषपापौघः शास्ता राज्यमकंटकं विप्रा वेदविदः शांता यशिनः शंसितव्रताः ज्ञानयज्ञतपोनिधाः

सर्वतः समदर्शिनः रुद्राध्यायजपं सम्यक् कुर्वंतु चिरमंगाशयाः तेषां जपानुभावेन सद्यः श्रेयो भविष्यति इत्युक्तवंतं नृपतिं मे

हामुनिं तमेव वव्रे प्रथमं क्रियागुरुं अथापरानप्यमलाशया मुनीनाज्ञापयामास सहस्रशः क्षणात् ते विप्राः शांतमनसोऽस

हस्रपरिसंमिताः कलशानां शतं स्थाप्य पुण्यवृक्षशतैर्वृतं रुद्राध्यायेन संजप्तोदकैश्चोपरि स्थितं तथा विधिवत्स्नापयामासुः

संपन्ने दिने स्नाप्यमानो मुनिवरैः स राजन्यकुमारकः अकस्मादिव विचेतनः प्राणमूर्च्छामवाप ह सहसा च प्रबुद्धो मुनि

भिः कृतरक्षणः उवाच कश्चित्पुरुषो दंडहस्तः समागतः मां प्रहर्तुं च नमति दंडहस्तोऽभियानकः सोऽपि चान्यैर्महावीरैः पुरुषै

रुपलक्षितः बध्वा पाशेन महता दूरं नीतस्तथाभवत् एतच्च दहमद्राक्षं भवद्भिः कृतरक्षणः इत्युक्तवंतं नृपतेस्तनयं [illegible]

श्री रु द्विजसत्तमाः आशीर्भिर्योजयामासुः भयं राजा मुमोच ह अथ सर्वान्द्विजश्रेष्ठान्दक्षिणाभिर्नृपोत्तमः भोजयित्वा वरा

नेनपूजयित्वाथभक्तितः प्रतिगत्याथभक्तितःशिवस्तेषांमुनीनांब्रह्मवादिनां भुक्त्वाबंधुजनैःसार्द्धंसभामामुपविश्यतत त
स्मिन्सभागतेवीरेमुनिभिःसहपार्थिवे आजगाममहायोगीदेवर्षिर्नारदःस्वयं तमागतंवीक्ष्यगुरुंमुनीनांसार्द्धंसदस्यै
रखिलैर्मुनींद्रैः प्रणम्यभक्त्याविनिवेश्यपीठेकृतोपचारोनृपतिर्बभाषे राजोवाच इदंकिमस्मिन्ब्रह्मांडेत्रैलोक्येकिं
चिदद्भुतं तन्नोब्रूहिवयंसर्वेत्वद्वाक्यामृतलालसाः नारदः अद्यचित्रंमहद्दृष्टंव्योम्नावतरतामया तच्छृणुष्वमहा
भागसहैभिर्मुनिपुंगवैः अद्यमृत्युरिहायातोविहंतुंतवपुत्रकं दंडहस्तोदुराधर्षोलोकमुद्द्रावयन्सदा ईश्वरोपिविधिर्दृष्टेनं
त्वत्पुत्रंहंतुमागतं गृहीत्वासुदृढंबध्वादंडेनाभ्यहनद्रुषा तंनीयमानंजगदीशसन्निधिंशीघ्रंवीरभद्रस्यभगवान्यमःस्व
यं कृतांजलिर्देवजयेत्युदीरयन्प्रणम्यमूर्ध्नानिजगादशूलिनं यमः देवदेवमहादेववीरभद्रेणमेप्रभोते निरागसिमहात्मन् राम
त्योकथंकोपस्त्वयोत्थितः निजकर्मानुभावेनबंधेनराजपुत्रंगतायुषं प्रहर्तुमुद्यतोमृत्योकोप[illegible] वीरभद्रः
दशवर्षसहस्रायुःसदाज्ञानमयःकथं विपत्तिमंतरायातिरुद्रस्नानहताशुभाः अ[illegible]पफल[illegible]निवारि

ते चित्रगुप्तंसमाहूयपत्रंवाचयमाचिरं नारदः अथाहूतश्चित्रगुप्तोयमेनसहसागत[illegible]स्मात[illegible]नो
परिपृष्टःसन्नाब्रवीत् द्वादशाब्दंवतस्यायुरित्युक्त्वाविस्मयश्च पुनर्लेखगतंप्राहसव[illegible] अथनीतो
यमोराजन्वीरभद्रंप्रसाद्यच कथंचिन्मोचयामासमृत्युंदुर्वारबंधनात् वीरभद्रेणमुक्तोथयमोगान्निजमंदिरं वी
रभद्रश्चकैलासमहंप्राप्तस्त्वयांतिकं अतस्तवकुमारोयंरुद्रजाप्यानुभावतः मृत्योर्भयमतिक्रम्यसुखंप्राप्नोतु
तंसमाः इत्युक्त्वानृपमामंत्र्यनारदेत्रिदिवंगते महर्षयःप्रमुदिताःस्वंस्वंजग्मुरथाश्रमं इत्थंकाश्मीरनृपतिरुद्र
जाप्यानुभावतः निस्तीर्यशेषपापानिदृष्ट्वापुत्रकः येकीर्तयंतिमनुजापरमेश्वरस्यमाहात्म्यमेतदथकर्ण
पुटैःपिबंति तेजन्मकोटिकृतपापगणैर्विमुक्ताःशांताःप्रयांतिपरमंपदमिंदुमौलेः ॥ ॥ इतिश्रीस्कंद०ब्रह्मो
त्तर०रुद्राध्यायमहिमानुवर्णनंनामएकविंशोध्यायः सूतः एवंशिवतमःपंथाःशिवेनप्रतिदर्शितः नृणां
संसृतिबद्धानांसद्योमुक्तिफलप्रदः अथदुर्मेधसांपुंसांवेदेष्वनधिकारिणां स्त्रीणांद्विजातिबंधूनांसर्वेषांचश

ब्रं.२२ रीरिणां एषसाधारणः पंथाः साक्षात्कैवल्यसिद्धिदः महामुनिजनैः सेव्यो देवैरपि सुपूजितः य[illegible]कथाश्रवणं
८८ शंभोः संसारभयनाशनं सद्यः सिद्धिकरं श्लाघ्यं पवित्रं सर्वदेहिनां अज्ञानतिमिरांधानां दीपायं ज्ञान
सिद्धिदः भवरोगनिबद्धानां सुसेव्यं परमौषधं महापातकसंघानां वज्रपातः सुदारुणः भंजनं कर्म
बीजानां साधनं सर्वसंपदां येऽशृण्वंति कथां शंभोः सदा भुवनपावनीं नैते मनुष्यलोकेस्मिन्रुद्रा एव न संश
यः श्रवणांजलिना गाथां न तथा कीर्त्तनेया[illegible]तां सतां तेषां पादरजांस्यत्र तीर्थानि मुनयो जगुः तस्मान्निःश्रेय
सं गंतुं यदि वांछति देहिनः तेशृण्वंतु नरा भक्त्या शैवीं पौराणिकीं कथां मुहूर्तं वापि शृण्व[illegible]नित्यमनालस्यादिने दिने शिवराम
यतः प्रतिदिनं श्रोतुमशक्तो यदि मानवः पुण्यमासेषु वै पुण्यदिने पुण्यतिथिष्वपि यः श[illegible]पुराणं स ८८

सुदीरितां सृचरन्ति संसारं गतिकर्मोघनाटवीं मुहूर्तं वा तदर्द्धं वा तदर्द्धं पावनीं कथां [illegible]तत्पान
तेषामस्ति दुर्गतिः यत्फलं सर्वदानेषु सर्वयज्ञेषु यत्फलं सकृत्पुराणश्रवणात्फलं विंदंति ते नराः कलौ युगे वि
शेषेण पुराणश्रवणादृते नास्ति धर्मः परः पुंसां नास्ति मुक्तिर्यशः परं पुराणश्रवणाच्छंभोर्नाम्नि संकीर्त्तनं परं
श्रुतस्य वमनुष्याणां कल्पद्रुममहाफलं कलौ हीनायुषो मर्त्या दुर्बलाश्च न पंडिताः दुर्मेधसो दुःखभाजो धर्माचार
विवर्जिताः इति संचिंत्य मनसा कृपया भगवान्बादरायणः विचार्य तेषां विदधे पुराणाख्यं सुधारसं पिबन्नेवाम
तं यल्लोके स्यादजरामरः शंभोः कथामृतं कुर्यात्कुलमेवाजरामरं बालो युवाथ वृद्धो वा दरिद्रो दुर्बलोपि वा
पुराणज्ञः सदा वंद्यः पूज्यश्च सुकृतात्मभिः नीचबुद्धिं न कुर्वीत राजा वापि कदाचन यस्य वक्त्रोद्गता वाणी कामधे
नुः शरीरिणां गुरवः संति लोकस्य गुणतो जन्मतश्च ये तेषामपि सर्वेषां पुराणज्ञः परो गुरुः भवकोटिसहस्रे

ब्रं॰२२

पुण्यश्रवणाय– सीनां यात्यधाम्यपुनर्यातिं कोन्यस्तस्मात्परोगुरुः पुराणज्ञः कृतीसंतः शांतोविजितमत्सरः साधुः
सकरुणोवाग्मीवदेत्पुण्यकथांसुधीः तद्ग्रामेसज्जनाकीर्णेसत्क्षेत्रेदेवतालये पुण्यनदनदीतीरेवदेत्पुण्यकथां
सुधीः श्रद्धाभक्तिसमायुक्ताश्चान्यकार्येष्वलालसाः आगत्यशुश्रूयाव्यग्राः श्रोतारःपुण्यभागिनः व्यासासनं
समारूढोयदापौराणिकोभवेत् आसमाप्तेःप्रसंगस्यनमस्कुर्यान्नकस्यचित् अभक्त्यायेकथांपुण्यांश्र
ण्वंतिमनुजाधमाः तेषांपुण्यफलंनास्तिदुःखंस्याज्जन्मजन्मनि यश्चपूर्त्यायवदुर्वृत्तायचान्यविजिगीषवः तेषां
कुटिलवृत्तीनामग्रेनैवचवदेत्कथां नद्दुर्जनसमाकीर्णेनचदस्यूपसंवृते देशेनद्यूतसदनेनवदेत्पुण्यकथां
सुधीः पुराणंयेचसंपूज्यतांबूलाद्युपचारकैः शृण्वंतिकथांपुण्यांदरिद्रास्युर्नसंशयः कथायांकीर्त्यमाना
यांयेगच्छंत्यन्यथानराः भोगांतरेप्रणश्यंतितेषांदाराश्चसंपदः सोष्णीषमस्तकायेचकथांशृण्वंतिपाव

शिवराम॰

नीं तेबलाकाःप्रजायंतेपापिनोमनुजाधमाः तांबूलंभक्षयंतोयेकथांशृण्वंतिपावनीं स्वविष्ठां[illegible]नरकेय
मकिंकराः येचतुंगासनासीनाकथांशृण्वंतिदांभिकाः अक्षयान्नरकान्भुक्त्वातेभवंत्येववायसाः येचवीरासनारूढाये
न वान्यथासंयुताः शृण्वंतिसत्कथांयेवैभवंत्यर्जुनपादपाः असंप्रणम्यशृण्वंतोविषवृक्षाभवंतिच कथांशयानाःशृ
ण्वंतोभवंत्यजगरानराः येशृण्वंतिकथांवक्तुःसमानासनसंस्थिताः गुरुतल्पसमंपापंसंप्राप्यनरकौकसः येनिंदंतिपु
राणज्ञंकथांवापापनाशिनीं तेवैजन्मशतंमर्त्याःशुनकाःसंभवंतिच कथायांवर्त्तमानायांयेवदंतिदुरुत्तरं तेगर्दभाः
प्रजायंतेकृकलासास्ततःपरं कदाचिदपियेपुण्यांनशृण्वंतिकथांनराः तेभुक्त्वानरकान्घोरान्भवंतिवनसूकराः
यकथामनुमोदंतिकीर्त्यमानांनराधमाः अशृण्वंतोपितेयांतिशाश्वतंपरमंपदं कथायांवर्त्तमानायांविघ्नंकुर्वंति
यनराः कोट्यब्दंनरकान्भुक्त्वाभवंतिग्रामसूकराः येश्रावयंतिमनुजान्पुण्यांपौराणिकींकथां कल्पकोटिश
तंसाग्रंतिष्ठंतिब्रह्मणःपरं आसनार्थंप्रयच्छंतिपुराणज्ञस्ययेनराः कंबलाजिनवासांसिमंचंफलकमे

पु २२

च सर्वलोकं समासाद्य भुक्त्वा भोगान्यथेप्सितान् शिवब्रह्मादिलोकेषु परं यांति निरामयं पौराणस्य प्र
यं कुर्वंति ये स्त्रं वसनं नवं भोगिनो ज्ञानसंपन्नास्ते भवंति सर्वशो भवे ये महापातकैर्युक्ता उपपातकिनश्च ये पुरा
णश्रवणादेव ते यांति परमं पदं अथ वक्ष्ये महापुण्यमितिहासं द्विजोत्तमाः शृण्वतां सर्वपापघ्नं सविचित्रं मनोह
रं दक्षिणापथमध्ये वै ग्रामो बाष्कलसंज्ञितः तत्रासन्द्विजनाः सर्वे मूढा धर्मविवर्जिताः ब्राह्मणाश्च दुराचाराः श्रु
तिस्मृतिपराङ्मुखाः जपस्वाध्यायनिरताः सदा दुर्विषयातुराः कृषीवलाः शस्त्रधरा नित्यं द्वेषा जिह्मवृत्तयः न ज्ञा
नं तिपरं धर्मं ज्ञानवैराग्यकारणं स्त्रियश्च कामनिरताः स्वैरिण्यः पापलालसाः दुर्बुद्धयः कुटिलमानसा हृता चारव
र्जिताः तत्रैको बिंदुलो नाम दुरात्मा ब्राह्मणाधमः आसीद्दुश्चापतिर्यासौ सदारापि कुमार्गगाः स्वपत्नीं वं श्रीराम
चुला नामहित्वा प्रतिनिशं तथा वेश्यासिवनमासाद्य रमते स्मरपीडितः सापि तस्यां गतायां [illegible] भिमुक्ता नवयौव २६
ना असहंती स्मरावेशं रेमे जारेण संगता तां कदाचिद्दुराचारां जारेण सह संगतां दृष्ट्वा [illegible] क्रोधादी

दुद्राव सत्वरः जारे पलायिते पत्नीं गृहीत्वा सो दुराशयः संपीड्य मुष्टिबंधेन पुनः पुनराड [illegible] रीपीडि
ता भर्त्रा कुपिता प्राह निर्भया भवान्प्रतिनिशं वेश्यां रमते का गतिर्मम अहं रूपवती यो [illegible] यौवनशालिनी
कथं सहिष्ये कामार्ता नोत्तमसंगविवर्जिता इत्युक्तः स तया पत्न्या पापो वा ब्राह्मणाधमः युक्तमेव तया केहिन
स्माद्दृश्यामिति हितं जारेभ्यो धनमाहृत्य नित्यं देहि परां गतिं तद्धनं देहि मे सर्वं पण्यस्त्रीणां ददामि तत् एवं संपू
येनेकामोन चापि ममापि च न थतिभर्तुर्वचनं प्रीत जगाह सा वधूः एवं तयोर्दंपत्योर्दुराचारप्रवृत्तयोः काले
ननिधनं प्राप्य स विप्रो बष्कलीपतिः मृते भर्तरि सा नारी पुत्रैः सह निजालये तस्थावदैवद्दशुश्राव सा पुण्यां पौराणिकीं
कथां योषितां जारसक्तानां नरके यमकिंकराः संतप्तं लोहपरिघं क्षिपंति स्मरमंदिरे इति पौराणिकेनोक्तं
सा श्रुत्वा धर्मसंहितां तमुवाच रहस्य वै भीता ब्राह्मणसत्तमं ब्रह्मन्पापमजानंत्या मया चरितमुल्बणं यौव
नेकामचारेण पौंश्चल्येन प्रवर्तितं इदं त्वद्वचनं श्रुत्वा पुराणार्थं विजृंभितं भीतिर्मे महती जाता शरीरं वेप

ब्रं.२२ तेनुक्तः धिङ्मां दुर्धियां सक्तां पापां स्मरविमोहितां अत्यस्यतत्सुखस्यार्थे घोरां यास्यामि दुर्गतिं क
थं पश्यामि नरके यमदूतान्भयानकान् कथं पाशैर्बद्धा कंठे वध्यमाना गतिं लभे कथं सोढव्यं नरके
खंडशो देहकर्तनं पुनः कथं पतिष्यामि संतप्तक्षारकर्दमे कथं च यानि लक्षेषु क्रिमिकीटखगादिषु प
भ्रमामि दुःखौघैः पीड्यमाना निरंतरं कथं च रौरवे तेमस्य मम घप्रमेतिभोजनं रात्रौ कथं करिष्ये हं नि
द्रां दुःखपरिप्लुता हाहा हतास्मि दग्धास्मि विदीर्णं हृदयापि च हा विधे मां महापापे चाबुद्धिं त्वया मम प
तनस्तु गरीत्काया क्लृप्ता तस्य देहिनः यद्दुःखं जायते घोरं तस्मात्कोटिगुणं मम अश्वमेधशतैस्सागंगा
स्नानाशतं समाः नेशुद्धिर्जायते प्रायो मम सोपस्य पापरीयसीं किं करोमि क्व गच्छामि किं वा स्मृत्वा शरणमाश्रये श्रीराम
कोवामां त्रायते लोके पतंतीं नरकार्णवे त्वमेव मे गुरुर्ब्रह्मन्त्वं माता त्वं पिता मम उद्धरा[illegible] दीनां त्वामवशर
णं गतां इति तां जातनिर्वेदां पतंतीं चरणद्वये उत्थाप्य कृपया धीमान्वक्ताषोपिद्व जंपुन[illegible]तपः ।२

स्याकाले प्रबुद्धासि श्रुत्वेमां महतीं कथां माभैषीस्त्वं वक्ष्यामि गतिं तेवै सुखावहां सत[illegible]द्य जानाते
मतिरीदृशी इंद्रियार्थेषु वैराग्यं पश्चात्तापो महानभूत् पश्चात्तापो हि सर्वेषामघानां निष्कृतिः परा तेनैव कुरुते
सद्यः प्रायश्चित्तं सुधीर्नरः प्रायश्चित्तानि सर्वाणि कृत्वानुविधिवत्सुनः अपश्चात्तापिनो म[illegible]नैन यांति गतिमुत्तमां
सत्कथाश्रवणाद्यस्ततानि सर्वाणि च वणात् पुण्यक्षेत्रर्षिनिवासाच्च चित्तशुद्धिः प्रजायते यथा सत्कथया नित्यं
चित्तं यानि विकंपनं तथान्यैः सद्धूते जीतो नैभवेन्मतिरुत्तमा यथा जलैः शोध्यमाना दर्पणं निर्मलं भवेत् तथा
तत्कथया नेतो विशुद्धिं परमां व्रजेत् विशुद्धे तस्मिन्नृणां ध्यानेश्रध्यस्युमापतिः ध्यानेन सर्वं विमलं मनोचार
कायसंभवं सद्यो विध्वंसयति मिरं याति शंभोः परंपरं अतः समस्तपुण्यानां सत्कथा साधनं परं कृपया
सिध्यति ध्यानं ध्यानात्कैवल्यमुत्तमं असिध्य परम ध्यानात्कथामितां स्वपातिनः सोन्यजन्मनि संप्रा
प्यध्यानं याति परां गतिं नामोच्चारणमात्रेण जित्वाम्स्वमजामिलः पश्चात्तपसमायुक्तो ध्यानेन परमात्म

शं २२ नि सर्वेषां श्रेयसां बीजं सत्कथाश्रवणं नृणां यस्तद्विहीनश्च पशुः कथं मुच्येत बंधनात् अतस्त्वमपि स
५८ र्वेभ्यो विषयेभ्यो निवृत्तधीः भक्तिं परां समास्थाय सत्कथां शृणु यत्नतः सर्वदा शृण्वंत्याः सत्कथां नित्यं च
तस्तु शुद्धिर्भविष्यति तेन ध्यायसि विश्वेशं ततो मुक्तिमवाप्स्यसि ध्यायतः शिवपादाब्जं मुक्तिरेकेन जन्मना
भविष्यति न संदेहः सत्यं सत्यं वदाम्यहं इत्युक्त्वा तेन विप्रेण सा नारी बाष्पलोचना पतित्वा पादयोस्तस्य ध
तार्थास्मीत्यभाषत अस्मिन्नेव महाक्षेत्रे तस्माद्विद्विजोत्तमात् सुश्राव सत्कथां साध्वी कैवल्यफलदा
यिनीं उवास द्विजस्तस्मै कथां कैवल्यवर्द्धिनीं यां श्रुत्वा मनुजाः सद्यः धृतस्य जो द्विषयवासनां तस्याश्चित्तं राम:
तदा शुद्धं वैराग्यरसपारया तदा वा च द्विजः शैवीं कथां भक्तिसमन्विता य ... तस्याः प्रसादमा
गच्छति तथा तथा शनैः शंभो ध्यानयोगसमास्थितात् शनैः शनैर्वैसरज जस्तम... विमुक्त सा विधि ५८
यभोगवर्जिता विशुद्धसत्त्वहृदयं द्विजस्त्रियो विवेश विश्वेश्वर योगचिंतनं इत्थं स ... ष्णा नारी

वद्धसद्भक्तिः ध्यायंती मुहुर्मुहुः शंभोश्चिदानंदमयं वपुः नित्यं तीर्थजले स्नात्वा जटावल्कलधारिणी भस्मो
द्धूलितसर्वांगी उयावल्कलभूषणा शिवनामजपासक्ता वाग्यता जितभोजना बहूपचारसंसाध्व्या सा सत्क
थाश्रवणोत्सुका गुरुशुश्रूषणासक्ता सकासक्ता सुहृज्जना गुरूपदिष्टध्यानेन शिवमेव सुतोषयत् विश्वे
श विश्वविलयस्थितिजन्महेतो विश्वेश वंद्य शिव शाश्वत विश्वरूप विध्वस्तकामभवभीतिगुणावभासा
स श्रीमन्महेश मम देहि कृपाकटाक्षं शंभो शशांककृतशेखर शंकरेश गंगाधरामरवरार्चितपादपद्म
नागेंद्रभूषण नगेंद्रनिकेतनेश भक्तोर्निहन्मयि निधेहि कृपाकटाक्षं श्रीविश्वनाथ करुणाकर शू
लपाणे भूतेश भर्ग भुवनेश्वर गीतकीर्ते श्रीविश्वनाथ मम दीनक विश्वमूर्ते गौरीपते मयि निधेहि
कृपाकटाक्षं इति प्रतिदिनं सत्या प्रार्थयंति महेश्वरं शृण्वती सत्कथां पुण्यां कर्मबंधं

ब्र०स्र समाछिनत् अथकालेनसानारीसमुत्सृज्यकलेवरं महेशानुचरैर्नीता जगामशिवमंदिरं तत्रस
७ र्वैर्महादेवंसेव्यमानंसमंततः गणेशभृंगिनंदीशवीरचंडेश्वरादिभिः उपास्यमानंगौरीशंकोटिसू
र्यसमप्रभं त्रिलोचनंपंचमुखंनीलग्रीवंसदाशिवं वामार्द्धेबिभ्रतींगौरींशशिपुंजसमप्रभां
दृष्ट्वासंभ्रमंनारीसाप्रणम्यपुनःपुनः आनंदाश्रुसमायुक्तारोमहर्षसमाकुला संमानिता
रुद्ररूपायापार्वत्याशंकरेणच तस्मिंल्लोकेसमानंदघनज्योतिषिशाश्वते लब्ध्वानिवासमचलं
भेजेसुखमनाहतं साकदाचिदुमांदेवीमुपसृत्यप्रणम्यच पर्यपृच्छतमेभर्त्ता क्वगतिंगमया
निति तामुवाचमहादेवीसतेभर्त्तादुराशयः भुक्त्वानरकदुःखानिविद्धजातःपिशाचतां पुनः
पप्रच्छसानारीदेवींत्रिभुवनेश्वरीं केनोपायेनमेभर्त्तासद्गतिंप्राप्नुयादिति अंबोवाच ७०

साप्यस्मात्कथांपुण्यांकदाचिच्छृणुयाद्यदि उत्तीर्यदुर्गतिंसर्वोमि[illegible]लोकंप्रयास्यति इति[illegible]नो
रीविहितांजलिः प्रार्थयामासतांदेवींभर्त्तुःपापविशोधने तयानु[illegible]ःप्रार्थ्यमानापार्व[illegible]तुंबरुं
नामगंधर्वंसमाहूयेदमब्रवीत् तुंबरोगच्छभद्रंतेविंध्यशैलेसहानया आकोपिशा[illegible]स्तत्रपस्याःपतिर
सन्नतः तस्याग्रेपरमांपुण्यांकथांमेसद्गुणैर्युतां आख्यायदुर्गतेर्मुक्तं तमानयममं[illegible]तिकं इति देवीसमादि
ष्टस्तुंबरुर्नारदप्रियः तयासहविमानेनविंध्याद्रिंसहसाययौ तत्रापश्यन्महा[illegible]तेनेत्रंमहास्नुं प्रकसं
तंरुदंतंचवल्गंतंचपिशाचकं बलाद्गृहीत्वातंपाशैर्बध्वासहनिवेश्यच तुंबरुर्दे[illegible]युक्तोजगौगौरीपतेः
कथांसपिशाचोमहापुण्यांकथांश्रुत्वापुरीद्विषः विधूयकलुषंसर्वंसप्ताहात्साप्स[illegible]कीर्तिं सपैशाचंवपुर्हि
त्वाशरीरंदिव्यमास्थितः जगौस्वयमपिश्रीमच्चरितंपार्वतीपतेः विमानमारुह्यसदिव्यरूपश्च[illegible]तुंबरुः

ब्रं·खं·२२ पार्श्वगतः स्वकांतया । गायन्महेशस्य गुणान्महेश्वरं जगाम कैलासपरं मनोरमं ॥ सूतः ॥ इत्येतत्कथितं पुण्य
७० माख्यानं दुरितापहं महेश्वरप्रीतिकरं निर्मलज्ञानसाधनं यदृच्छोत्रियेन्मर्त्यः श्रद्धया द्विसमाहितः शंभो
र्गुणानुकथनं विचित्रं पापनाशनं परमानंदजनकं भवरोगमहौषधं मुक्तोहि विप्रलोकान् नागान्मुक्तो याति परां ग
तिं यूयं धन्या महाभागाः कृतार्था मुनिपुंगवाः येसेवंते सदा शंभोः कथामृतरसायनं [illegible]नराभ्याम रत्नं प्राप्नु
वंति शिवालये ते जन्मभाजः खलु जीवलोके येषां मनो ध्यायति विश्वनाथं वाणी [illegible]णान्स्तौति नवा [illegible]श्रृणोति
श्रोत्रद्वयं ते भवमुत्तरंति विविधगुणविभेदैर्निमस्त[illegible]ह्यरूपं जगति जहि हि कामं भासमानं महिम्ना स्वमहिसि
विहरंतं वाङ्मनोवृत्तिदूरं परमशिवमनंतो नैर्मल्य[illegible]नासां इद्रप्रपद्ये ॥ इति श्री स्कं[illegible]तः[illegible]खंडे शिवराम·
पुराणफलानुवर्णनं नाम द्वाविंशोध्यायः समाप्तः ॥ श्रीस[illegible]रणारविंदार्पणमस्तु ॐ बोधाय ७०

श्री ॥ छ ॥ इति ग्रंथ शेरखंडं समाप्ति मगमत्